॥ श्रीगणेशायनमः॥ मातापित्रोर्जगतोनमोवामार्द्धजानये॥ सद्योदक्षिणदृक्या तसंकुचद्वामदृष्टये॥१॥ अन्तरायति
मिरापशांतयेशांतपावनमचिन्त्यवैभवं॥ तन्नरंवपुषिकुंजरंमुखमन्महेकिमपितुंदिलंमहः॥२॥ शरणंकरवाणिकामदं
तेचरणंवाणिचराचरैरपजीव्यं॥ करुणामसृणैःकटाक्षपातैःकुरुमामंबकृतार्थसार्थवाहं॥३॥ इहान्वयमुखेनैवसर्वव्या
ख्यायतेमया॥ नामूलंलिख्यतेकिंचिन्नानपेक्षितमुच्यते॥४॥ आशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमितिशास्त्रा
त्काव्यादौवस्तुनिर्देशात्कथंप्रस्तौति॥ कश्चित्कान्ताविरहगुरुणास्वाधिकारात्प्रमत्तःशापेनास्तंगमितमहिमावर्षभोग्य
ेनभर्तुः॥ यक्षश्चक्रेजनकतनयास्नानपुण्योदकेषुस्निग्धच्छायातरुषुवसतिंरामगिर्याश्रमेषु॥१॥ कश्चिदितिस्वाधि
कारात्त्वनियोगात्प्रमत्तः॥ प्रमादोनवधानंतत्स्मरः॥ जुगुप्साविरामःप्रमादार्थानामुपसंख्यानमित्यपादानत्वंतस्मा
त्संचर्मा॥ अतएवापूराधाहेतोः कान्ताविरहेणगुरुणादुर्भरेणदुस्तरेणेत्यर्थः॥ गुरुरुक्रगीष्पतिश्रेष्ठगुरापितरिदुर्भर इति
शब्दार्णवे॥ वर्षभोग्येणसंवत्सरभोग्येन॥ कालाध्वनोरत्यंतसंयोगेद्वितीयाअत्यंतसंयोगेचेतिसमासः॥ कुमतिश्चेतिणत्वं
भर्तुःस्वामिनः॥ शापेनास्तंगमितोमहिमासामर्थ्यंयस्यसोऽस्तंगमितमहिमाअस्तमितिमकारान्तमव्ययं॥ तस्यद्वितीया
तियोगविभागात्समासः॥ कश्चिदनिर्दिष्टनामायक्षोदेवयोनिविशेषः॥ विद्याधराप्सरायक्षरक्षोगंधर्वकिन्नराः पिशाचो
गुह्यकःसिद्धोभूतोमीदेवयोनयइत्यमरः॥ जनकतनयायाःसीतायाःस्नानेरवगाहनेःपुण्यानिपवित्राणि उदकानियेषुते
षुपावनेष्वित्यर्थः॥ छायाप्रधानास्तरवश्छायातरवः॥ शाकपार्थिवादित्वात्समासः॥ स्निग्धाःसांद्राः छायातरवोनमेरुवृ
क्षायेषुतेषुवसतियोग्येष्वित्यर्थः स्निग्धंतुमसृणेसान्द्रे॥ छायावृक्षोनमेरुः स्यादितिविश्वशब्दार्णवे॥ रामगिरेश्चित्रकू
टस्याश्रमेषुवसतिं॥ वहिवसर्तिप्रत्ययश्चेत्योपादिकोतिप्रत्ययः॥ चक्रेकृतवान्॥ अत्रसोविप्रलंभाख्यःशृंगारः॥ तत्रापु
न्मादावस्थाअतएवैकत्रानवस्थानंसूचितंआश्रमाधिति बहुवचनेनसीतांप्रतिरामस्यहनुमत्संदेशंमनसिनिधाय
मेघसंदेशंकविःकृतवानित्याहुः॥ अत्रकाव्येसर्वत्रमंदाक्रांतावृत्तं॥१॥ तस्मिन्नद्रौकतिचिदबलाविप्रयुक्तःस
कामीनीत्यामासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः॥ आषाढस्यप्रथमदिवसेमेघमाश्लिष्टसानुंवप्रक्रीडापरिणत

गजप्रेक्षणीयं ददर्श ॥ २ ॥ तस्मिन्निति ॥ तस्मिन्द्रौ चित्रकूटाद्रौ अबलाविप्रयुक्तः कान्ताविरहीकनकस्य बलवः कटकं ॥ कटकंबलयोऽस्त्रियामित्यमरः तस्यप्रशैथिल्यपातनरिक्तः शून्यः प्रकोष्ठः कूर्प्परादधः प्रदेशोयस्यसतथोक्तः ॥ कस्मांतरप्रकोष्ठः स्यात्कूर्प्परादधरतिशाश्वतः ॥ विरहदुःखात्कृशइत्यर्थः कामी कामुकः कतिचिन्मासानष्टोनासानित्यर्थः मासानन्यानामयच्चतुरइतिवक्ष्यमाणत्वात् नीत्वायापयित्वा आषाढनक्षत्रेणयुक्तापौर्णमासीआषाढी ॥ नक्षत्रेणयुक्तःकालइत्यण् ॥ टिड्ढाणञित्यादिनाङीप्सास्मिन्पौर्णमासीत्याषाढोमासः सास्मिन्पौर्णमासीतिसंज्ञायामित्यणतस्यप्रथमदिवसेआश्लिष्टसानुमाकं तकूटंवप्रक्रीडाउत्सवातकेपैलेउत्सवातकेलिःक्रीडाघेवप्रक्रीडानिगद्यतइतिशब्दार्णवेनासफरिणतस्निर्यकूटंतप्रहारःतिर्यग्दंतप्रहारस्तकगजःपरिणतोमतइतिहलायुधःसचासौगजश्चसइववप्रेक्षणीयंदर्शनीयंमेघंददर्शगजप्रेक्षणीयमित्यत्रवलोपालोपालुप्तोपमाकेचिदाषाढस्यप्रथमदिवसइत्यत्रप्रत्यासन्ननभसीतिवक्ष्यमाणनभोमासप्रत्यासन्नमत्रस्यप्रशमदिवसइतिपाठंकल्पयंतितदसंगतंप्रथमातिरेककारणाभावात् ॥ नभोमासस्यप्रत्यासत्यर्थमित्युक्तमितिचेन्नप्रत्यासत्तिमात्रस्यमासप्रत्यासत्यैवप्रथमदिवसस्याप्युपपत्तेः अत्यंतप्रत्यासत्तेरुपयोगप्रभावेनाविवक्षितत्वात् ॥ विवक्षितत्वेवास्वपक्षेपिप्रशमदिवसातिमक्षणेमेघदर्शनकल्पनायांप्रमाणाभावेन तदसंभवात् ॥ प्रत्युतस्वपक्षएवकुशलसंदेशस्यभाव्यनर्थप्रतीकारार्थस्यपुरतएवानुमानमुक्तंभवतीत्युपयोगः ॥ स्थितनन्वन्नत्तस्यनायंविवेकइतिचेन्न ॥ उन्मत्तस्यनानर्थस्यप्रतीकारार्थप्रवृत्तरपीतिसंदेशएवमाभूत्तथाचकाव्यारंभएवाप्रसिद्धःस्यादित्येहामूलछेदीपंडितप्रत्यवकर्षः ॥ कथंतर्हिशापांतोमेभुजगशयनादुत्थितेशार्ङ्गपाणावित्यादिनाभगवत्प्रबोधावधिकस्यशापस्यमासचतुष्टयावशिष्टत्योक्तिः ॥ दशदिवसाधिक्यादितिचेत्स्वपक्षेपिकथंसाविंशतिदिवसेन्यूनत्वादितिसंतोष्टव्यं ॥ तस्मादीषद्वैषम्यमविवक्षितमितिसंक्षिप्तंप्रथमदिवसइति ॥ २ ॥ तस्यस्थित्वा

कथमपिपुरः कौतुकाधानहेतोरंतर्बाष्पश्चिरमनुचरोराजराजस्यदध्यौ ॥ मेघालोकेभवतिसुखिनोप्यन्यथावृत्तिचेतः ॥ कंठाश्लेषप्रणयिनिजनेकिंपुनर्दूरसंस्थे ॥ ३ ॥ तस्येति ॥ राजानोयक्षाःराजाप्रधान्येपचंडेयक्षसत्रियशक्रयोरितिविश्वः राज्ञांराजाराजराजःकुबेरः राजराजोधनाधिपइत्यमरः ॥ राजहःसखिभ्यष्टच्तत्स्यानुचरोयक्षः अन्तर्बाष्पोधीरोदारत्वादंतःस्तंभिताश्रुःसन्कौतुकाधानहेतोरभिलाषोत्पादनकारणस्यकौतुकंचाभिलाषस्यादुत्सवेनर्महर्षयोरितिविश्वः तस्यमेघस्याग्रेकथमपिगरीयसाप्रयत्नेनेत्यर्थः ॥ ज्ञानहेतुर्विवक्षायामप्यादिकथमव्ययमुकथमादितथाप्यंतंयत्नगौरवाहयोरित्युज्ज्वलः ॥ स्थित्वाचिरंदध्यौचिंतयामास ॥ ध्येचिंतायामितिधातोर्लिट् ॥ मनोविकारोपशमनपर्यंतमितिशेषःविकारहेतुमाह ॥ तथाहिमेघालोकेमेघदर्शनेसतिसुखिनोपिप्रियादिजनसंगतस्यापिचेतःचित्तमन्यथाभूतावृत्तिर्व्यापारोयस्यतदन्यथावृत्तिभवतिविकृतिमापद्यतइत्यर्थः केठाश्लेषप्रणयिनिकेठालिंगनार्थिनिजनेदूरसंस्थेसतिकिंपुनर्विरहिणःकिमुतवक्तव्यमितिभावः ॥ विरहिणांमेघसंदर्शनमुद्दीपनंभवतीतिभावः अर्थांतरन्यासोलंकारः तदुक्तंदंडिना ॥ ज्ञेयःसोर्थांतरन्यासोवस्त्वंतरस्तुत्यकिंचनतत्साधनसमर्थस्यन्यासोयोन्यवस्तुनइति ॥ ३ ॥ प्रत्यासन्ननभसिदयितावितालस्वार्थांजीमूतेनस्वकुशलमयींहारयिष्यन्प्रवृत्तिं ॥ सप्रत्यग्रैःकुटजकुसुमैःकल्पितार्घायतस्मैप्रीतःप्रीतिप्रमुखवचनंस्वागतंव्याजहार ॥ ४ ॥ अथसमाहितान्तःकरणःसन्किंकृतवानित्यतआहप्रत्यासन्नइतिसयक्षोयश्चिरंदध्यौसइत्यर्थः ॥ नभसिश्रावणेनभःखंश्रावणेनभस्वित्यमरः ॥ प्रत्यासन्नेआषाढस्यानंतरंसन्निकृष्टप्राप्तेसतीत्यर्थः दयितायाजीवितालंवनार्थीसन्वर्षाकालस्यविरहदुःखजनकत्वादुत्पन्नप्रतीकारादनर्थादनर्थासत्तिप्रवृत्तिबंधएववरमितिन्यायेनप्रागेवधियाप्राणधारणोपायंचिकीर्षुरित्यर्थः ॥ जीवनस्योदकस्यमूतःपटबंधोजीमूतः ॥ वस्त्रबंधो पृषोदरादित्वात्साधुरिति ॥ मूतःस्यात्पटबंधेपीतिरुद्रः तेनजीमूतेनजलधरेणप्रयोज्येनस्वकुशलमयींस्वक्षेमप्रधानांप्रवृत्तिंवार्त्तां ॥ वार्त्तोप्रवृत्तिर्वृत्तांतइत्यमरः हारयिष्यन्प्रापयिष्यन् ॥ तृदृशेषेचेतिचकारात्क्रियार्थक्रियाप

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

पदाच्छुद्प्रत्ययः॥ जीवनार्थं कर्मजीवनप्रदेनेव कर्त्तव्यमितिभावः॥ ल्युट्चेरन्यतरस्यामिति कर्मसंज्ञायाविकल्पात्
पक्षेकर्त्तरिल्टतीया॥ प्रत्ययेरभिनवैः कुटजकुसुमैर्गिरिमल्लिकाभिः॥ कुटजोगिरिमल्लिकेतिहलयुधः॥ कल्पि
तानुष्टितार्घः पूजाविधिर्यस्मैतस्मैमूल्येपूजाविधावर्घदित्यमरः तस्मैजीमूताय॥ क्रियाग्रहणमपिकर्त्तव्यमि
तिसंप्रदानत्वाच्चतुर्थीत्रीतिप्रमुखानिप्रीतिपूर्वकावचनानियस्मिन्कर्मणितत्प्रीतिप्रमुखवचनंयथातथाशोभन
मागतंस्वागतंस्वागतवचनंप्रीतः सन्याजहारकुशलागमनंपप्रच्छेत्यर्थः॥ नाथेनत्वत्राप्रत्यासन्नेमनसीति
साधीयान्याठःकल्पितःप्रत्यासन्नेप्रकृतिमापन्नेसतीत्यर्थः यस्कृतेनैवपूर्वपाठविरोधःप्रदर्शितःसोस्माभि
राषादस्यप्रथमदिवसइत्येतत्पाठकिल्पवसमाधानेनैवसमाधायपरिष्कृतः॥ ४॥ धूमज्योतिःसलिलमरुतां
सन्निपातः क्वमेघःसंदेशार्थाः क्वपटुकरणैःप्राणिभिःप्रापणीयाः॥ इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तंय
याचेकामार्त्तोहिप्रकृतिकृपणाश्चेतनाचेतनेषु॥ ५॥ ननुचेतनसाध्यमर्थंकथमचेतनेननकारयिष्यतीत्
त्यपेक्षायोक्तविसमाधत्तधूमेति॥ धूमश्चज्योतिश्चसलिलंचमरुद्वायुश्चतेषांसन्निपातःसंघातोमेघः
क्वअचेतनत्वात्संदेशानर्हइत्यर्थः षट्करणैःसमर्थेर्द्वियैःकरणंसाधकतमंक्षत्रगात्रेंद्रियेषुचेत्यमरः॥ प्रा
णिभिश्चेतनैः॥ प्राणितुचेतनोजन्मीत्यमरः प्रापणीयाः प्रापयितव्याः॥ संदिशंतइतिसंदेशास्तएवार्थाःक
इत्येवमौत्सुक्यादिष्टार्थेर्घुक्तत्वात्॥ इष्टार्थेर्युक्तऔत्सुक्यइत्यमरः संप्रदानत्वात्कुशलवचनेनाभिमुखीचकार
इत्यर्थः॥ अपरिगणयनविचारयन्गुह्यकोयक्षस्तंमेघंययाचेयाचितवान्॥ यादृपान्वायांतथाहिका
मार्त्ताःमदनातुराश्चेतनाश्चाचेतनाश्चेतनेषुविषयेप्रकृतिकृपणाःस्वभावदीनाःकामोपहतांयुक्तायुक्तवि
वेकेशून्यत्वादचेतनयाज्ञानविरुध्यतइत्यर्थः॥ अत्रमेघसंदेशयोर्विरूपयोर्घटमाद्विषमालंकारः॥ त ॥२॥

दुक्तम्॥ विरुद्धकार्यस्यात्तत्तिर्यत्रानर्थस्यवार्भवेत्॥ विरूपघटनाचासौविषमालंकृतिःस्त्रिया॥ साचार्थान्त
रन्यासानुप्राणितातत्समर्थकत्वेनैवचतुर्थपादस्यापन्यासात्॥ ९॥ जातेवंशेभुवनविदितपुष्करावर्त्तकानां जा
नामित्वाप्रकृतिपुरुषंकामरूपंमघोनः॥ तेनार्थित्वंत्वयिविधिवशाद्दूरबंधुर्गतोहंयाच्ञामोघावरमधिगुणेना
धमेलब्धकामा॥ ७॥ संप्रतियाच्ञाप्रकारमाहजातमिति॥ हेमघत्वांभुवनेषुविदितेभुवनविदितेनिश्चितभू
तार्थेक्तः॥ गतिबुद्ध्यादिनावर्त्तमानार्थत्वेपिक्तस्यचवर्त्तमानइतिभुवनशब्दस्यषष्ठ्यंततानियमात्समासान
स्यात्तेनचपूजायामितिनिषेधात्॥ पुष्कराण्यावर्त्तकाश्चकेचिन्मघानाश्रेष्ठास्तेषांवंशेजातंमहाकुलप्रसूत
मित्यर्थः॥ कामरूपमिच्छाधीनविग्रहं॥ दुर्गादिसंचारक्षममित्यर्थः॥ मघोनइंद्रस्यप्रकृतिपुरुषंप्रधानपुरुषं
जानामि॥ तेनत्वत्स्वभुत्वादिजानामीत्यादिगुणयोगित्वेनहेतुना विधिवशाद्दूरबंधुर्वायत्तत्वात्॥ विधिर्विधानेदै
वेचेत्यमरः वशमायत्तंवशमिच्छाप्रभेदयोरितिविश्वः॥ दूरबंधुर्यस्यसदूरबंधुः वियुक्तभार्यार्हत्वव्यर्थित्वं
गतः याचकस्ययाच्यगुणोत्कर्षःकुत्रोपयुज्यतइत्याशंक्यदेवाद्याञ्चाभंगपिलाघवदोषाभावएवोपयोग
इत्याहयांचेतितथाहि॥ अधिगुणाधिकगुणेपुंसिविषयेयांचामोघानिःफलापिवरमीप्सितंयं॥ दातुर्गुणाढ्य
त्वात्प्रियत्वंयाचेवफल्यादिषप्रियत्वमितिभावः॥ अधमेनिर्गुणेयांचालब्धकामापिनवरमीप्सितंयमपिनप्र
वर्तीत्यर्थः॥ दैवाद्धतवरःश्रेष्ठत्रिषुक्लीबंमनाविप्रपमित्यमरः॥ अथेतरन्यासानुप्राणितःश्रेयोलंकारः॥ तदुक्तं
दंडिना॥ श्रेयःप्रियतराख्यानमिति॥ एतदाद्यपादत्रयेचतुर्थपादस्यनोर्थांतरन्यासनोपजीवितमितिस्फु
व्यक्तमेतत्॥ ७॥ संतप्तानांत्वमसिशरणंतत्पयोदप्रियायाःसंदेशंमेहरधनपतिक्रोधविश्लेषितस्य॥ गंतव्या
तेवसतिरलकानाम्यक्षश्चरणांवात्यायानस्थितहरशिरश्चंद्रिकाधौतहर्म्या॥ ७॥ संतप्तानामिति॥ हेपयो
दत्वंसंतप्तानांन्यतपेनवाप्रवासविरहेणवासंज्वरितानां॥ संतापःसंज्वरःसमावित्यमरः॥ शरणंपयोदाना
नातपरिक्लान्तानांप्रोषितानांस्वस्थानप्रेरणायाचरक्षकोसि॥ शरणंगृहरक्षित्रोरित्यमरः॥ तत्तस्मात्कारणा

द्रुनपतेः कुबेरस्य क्रोधेनविश्लेषितस्यप्रिययाविरहितस्येममम संदेशंवार्त्तांप्रियायाः हरप्रियांप्रति नेयेत्यर्थः संबंधसामान्येषष्ठीसंदेशहरणेनावयोः संतापंनुदत्यर्थः॥ कुत्रस्थानमास्थितातत्स्थानस्यकिंव्यावर्तकंतत्राह॥ गंतव्येतिबहिर्भवंवात्यबहिर्देवपंचजनेभ्यश्चक्षण्बाह्येउद्यानेस्थितस्य हरस्यशिरसियाचंद्रिकातयाधौतानिनिर्मलानिहर्म्याणिधनिकभवनानियस्यांसातथोक्ताहर्म्यादिधनिनोवासइत्यमरः अनेनव्यावर्तकमुक्तं॥ अलकानामालकेतिप्रसिद्धायक्षेश्वराणांवसतिःस्थानंतेतवगंतव्यात्वयागंतव्येत्यर्थः॥ कृत्यानोकर्तरिषष्ठी॥ ७॥ त्वामारूढंपवनपदवीमुद्गृहीतालकान्ताःप्रेक्षिष्यंतेपथिकवनिताःप्रत्ययादाश्वसंत्यः॥ कःसन्नद्धेविरहविधुरांत्वय्युपेक्षेतजायांनस्यादन्योप्यहमिवजनोयःपराधीनवृत्तिः॥ ८॥ मदर्थंप्रवृत्तस्यतेपथिकांगनाजनाश्वासनमानुषंगिकंफलमित्याहत्वामितिपवनपदवीमाकाशमारूढंत्वांपथानंगछंतितेपथिकाः॥ पथः कनितिकन्प्रत्ययः॥तेषांवनिताःप्रोषितभर्तृकाः॥ प्रत्ययाःस्त्रियागमनविश्वासात्॥ प्रत्ययोधीनशपथज्ञानविश्वासहेतुर्धित्यमरः॥आश्वसंत्योविश्वसिताःश्वसिधातोःशत्रंतादुगितश्चेतिङीपु॥ तथाद्गृहीतालकांताः॥ दृष्टिप्रसारार्थमुन्मय्योद्गृतालकाग्राःसत्यःप्रेक्षिष्यंतेऽत्युत्कंठतयाद्रक्ष्यंतीत्यर्थः॥ मदागमनेनपथिकाःकथमागमिष्यंतीत्यत्राहतथाहि॥ त्वयिसन्नद्धेव्याप्ततेसतिविरहेणविधुरांविवशांजायांकउपेक्षेतनकोपीत्यर्थः॥अन्योपिमद्व्यतिरिक्तोपियोजनोहमिवपराधीनवृत्तिःपरायत्तजीवनकोनस्यात्॥स्वतंत्रस्तुनकोप्युपेक्षेतेतिभावः॥अत्रार्थांतरन्यासोलंकारः॥तदुक्तंकार्यकारणसामान्यविशेषाणांपरस्परंसमर्थनंयत्रसोर्थांतरन्यासउदाहृतइतिलक्षणात्॥ ८॥मन्दंमन्दंनुदतिपवनश्चानुकूलोयथात्वांवामश्चायंनदतिमधुरंचातकस्तेसगंधः॥गर्भाधानक्षणपरिचयान्नूनमावद्धमालाःसेविष्यंतेनयनसुभगंखेभवंतंबलाकाः॥ ९॥निमित्तान्यपितस्यभाविनिदर्शयतेत्याहमंदंमंदमितिअनुकूलःपवनोवायुस्त्वामंदंमंदमतिमंदमित्यर्थः॥अत्रककयोश्चिद्वीप्सायामेवद्विरुक्तिर्निर्बाह्या॥प्रकारेगुणवचनस्येत्यतदाश्रयणात्तत्कर्मधारयवद्भावेसुपलुगिमंदंमंदमितिस्यात्॥तदेवाह

वामनः मंदंमंदमित्यत्र॥ प्रकारार्थेद्विर्भावइति॥यथासदृशंभाविफलानुरूपमित्यर्थः॥यथासादृश्ययोग्यत्वीप्सास्वार्थानतिक्रमइतियादवः॥नुदतिप्रेरयति॥अयंसगंधःसगर्वःसंबंधइतिकेचित्॥ गंधोगंधकआमोदेलेशेसंबंधगंधयोरित्युभयत्रापीतिविश्वः॥तेनववामोवामभागस्थः॥वामस्तुवंकेरम्येस्यात्सव्येवामोगगेपीतिशब्दार्णवे॥चातकःपक्षिविशेषश्चमधुरंश्राव्यंनदतिव्याहरति॥इदंनिमित्तद्वयंवर्तते॥ वर्तिष्यतेचापरंनिमित्तमित्याहगर्भेति॥गर्भःकुक्षिस्थाजतुः॥गर्भोपवरकेत्यग्नौस्करेपवनसकंटके॥कुक्षौकुक्षिस्थजंतौचेतियादवः॥तस्याधानसुत्पादनंतदेवक्षणउत्सवःस्करेहेतुत्वादितिभावः॥निर्व्यापारस्थितोकालविशेषोत्सवयोःक्षणःइत्यमरः॥ तस्मिन्परिचयादभ्यासाद्धेतोःखेव्याप्तिआवद्धमालागर्भाधानस्करार्थंत्वत्समीपेबद्धपंक्तयइत्यर्थः॥उक्तंचकर्णादये॥गर्भेबलाकादधत्तेभ्रयोगात्रकिनिबद्धाबलयःसमंतादिति॥ बलाकाबलाकांगनानयनसुभगंदृष्टिप्रियंभवंतंत्वनंसत्यंसेविष्यंते॥अनुकूलमारुतचातकशब्दितबलाकादर्शमानांशुभंसूचकत्वंशकुनशास्त्रेदृष्टंतद्विस्तरभयान्नालेखि॥ ९॥ ताञ्चावश्यंदिवसगणनातत्परामेकपत्नीमव्यापन्नामविहतगतिर्द्रक्ष्यसिभ्रातृजायाम्॥आशाबंधःकुसुमसदृशंप्रायशोह्यंगनानांसद्यःपातिप्रणयिहृदयंविप्रयोगेरुणद्धि॥ १०॥ नचतस्यानाशाद्भुतस्वल्पनाद्वानिरर्थकस्त्वत्प्रत्ययासइत्याहतांचेतिहेमर्घदिवसानामवशिष्टदिनानांगणनायांसंख्यानेतत्परामासक्ता॥ तत्परत्वमितासक्तावित्यमरः॥अतएवाव्यापन्नाममृतांशापावसानंमदागमनंप्रत्याशयाजीवंतीमित्यर्थः॥एकःपतिर्यस्याःसाएकपत्नीनापतिव्रतामित्यर्थः॥नित्यंसपत्न्यादिधितिरिपुनकारश्च॥ भ्रातुर्मेजायांमात्वन्निःशंकंदर्शनीयामित्याशयःतांमद्वियोगेविहतगतिरविच्छिन्नगतिःसन्नवश्यंद्रक्ष्यसिआलोकयिष्यसितथाहि॥आशाअतिस्पृष्णा॥ आशादिगतितृष्णयोरितियादवः॥बध्यतेऽनेनेतिबंधः बंधनेघञ्नमितिप्राप्तंआशोवबंधःआशाबंधःकर्त्तृप्रणयिप्रेमयुक्तेअतएवकुसुमसदृशंसुकुमारमित्यर्थः॥अतएववियोगविरहेसद्यःपातिसद्योपतनशीलमंगनानांहृदयंजीवितं॥ हृदयंजीविते चित्तेवक्षस्याकृतयोरितिशब्दार्णवे॥प्रायशःप्रायेणरुणद्धिप्रतिबध्ना

तीत्यर्थान्तरन्यासः ॥१०॥ कर्त्तुं यच्छ्रुभ्रमवति महीमुछिलीध्रामवंध्यां मूतश्छ्लोतश्रवणसुभगं गर्जितं मानसोत्काः
आकैलाशाद्बिसकिसलयच्छेदपाथेयवन्तः संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११॥ संप्रति सहायसंपत्तिश्चास्तीत्याह कर्त्तुमिति। यद्गर्जितं कर्त्तुं मही मुछिलीध्रांऽङ्कुतकेदलिकां। कदल्यां चाशिलींध्रास्यादिति शब्दार्णवे। अतएवावंध्यांसकलांकर्त्तुं शक्नोतिशिलींध्राणां भाविसस्यसंपत्तिसूचकत्वादितिभावः। तदुक्तंनिमित्तनिदाने। कालाभ्रयोगादुदिताः शिलींध्राः संपन्नसस्यां कथयंतिधात्रीमिति। तच्छ्रवणसुभगंश्रोत्रसुखंलोकस्येतिशेषः। तेतवगर्जितमाकर्ण्यमानसोत्काः मानसेसरसिउन्मनसः उत्कंठाइतियावत्। उत्का उन्मनाइतिनिपातात्साधुः। कालांतरेमानसस्यहिमदुष्टत्वात्। हिमाः स्यचहंसानांरोगहेतुत्वादन्यत्रगताहंसाः पुनर्वर्षासुमानसमेवगछंतीतिप्रसिद्धिः। बिसकिसलकानांमृणालाग्राणांछेदैः शकलैः पाथेयवन्तः पथिसाधुपाथेयंपथिभाज्यं। पथ्यतिथ्यवसतिस्वयंतदर्हं। तद्वंतः मृणालाग्रशकलवन्तइत्यर्थः। राजहंसाहंसविशेषाश्च। राजहंसास्तुचंचुचरणेलोहिताः सिताइत्यमरः। नभसिव्याभ्रिभवतस्तवोत्कैलाशात्कैलाशपर्यंतंपदद्वयंचेतत्। सहायाः सत्यात्राः। सहायस्तुसत्यात्रः स्यादिति शब्दार्णवे। संपत्स्यंतेभविष्यंति ॥११॥ आपृच्छस्वप्रियसखममुंतुंगमालिंग्यशैलंवंद्यैः पुंसांरघुपतिपदैरंकितंमेखलासु। कालेकालेभवतिभवतोयस्यसंयोगमेत्यस्नेहव्यक्तिश्चिरविरहजंमुंचतोबाष्यमुष्णं ॥१२॥ आपृच्छस्वेति। प्रियंसखायंप्रियसखंराजाहंसंविष्वष्टजिति टुओछूसम्प्रसारणं। तुंगमुन्नतंपुंसांवंद्यैः सकलाराधनीयैररघुपतिपदैरामपादन्यासैर्मेखलासुकटकेषु। अखंमखलाश्रोणिस्थानेडिकटकेकटिबंधंभबंधनइतियादवः। अंकितंचिह्नितं। इत्यमखिलस्नेहत्वात्पवित्रत्वाच्चसंभाषनार्हममुंशैलंचित्रकूटाद्हिमालिंग्यापृच्छस्व। साधोयाचीत्यामंत्रणेनसंपाजयअमंत्रणसंभाजने। अपृच्छनमित्यमरः। आङः। तदपृच्छेयारूपसेरव्यानमित्यात्मनेपदं। सखिवत्निर्वहति

कालेकालेभवतिभवद्कालेः। स्मरत्तत्समागमनकालश्चकालशब्देनोच्यते। वीप्सायांद्विरुक्तिः भवतःसंयोगंसंपर्कमित्यचिरविरहजमुष्णंबाष्यमुष्णाणंनेत्रजलंच। बाष्पोनेत्रजलोभ्रूणारितिविश्वः। मुंचतोयस्यशैलस्यस्नेहव्यक्तिःस्नेहाविर्भावोभवति। स्निग्धानांहिचिरविरहसंगतानांहिबाष्यपातोभवतीतिभावः ॥१२॥ मार्गंतावच्छृणु कथयतस्त्वत्प्रयाणानुरूपंसंदेशंमतदनुजलदश्रोष्यसिश्रोत्रपेयं। स्विन्नःस्विन्नः शिखरिषुपदंन्यस्यगन्तासियत्रक्षीणःक्षीणःपरिलघुपयःस्रोतसांचोपभुज्य ॥१३॥ संप्रतितस्यमार्गंकथयति। मार्गमितिहेजलदतावदिदानींकथयतोमत्तइतिविशेषः। त्वत्प्रयाणस्यानुरूपमनुकूलं मार्गमध्वानंमार्गोमृगपदमार्गिसाम्येर्ष्येन्वेषणे। ध्वनिइतियादवः। शृणु। तदनुमार्गश्रवणानंतरंश्रोत्राभ्यांपेयंपानार्हमतित्वष्णयाश्रोतव्यमित्यर्थः। पेयग्रहणात्संदेशस्यामृतसाम्यंसूचयते। मेसंदेशंवाचिकंसंदेशवाग्वाचिकंस्यादित्यमरः। श्रोष्यसि यत्रमार्गेस्विन्नःस्विन्नोमीष्णंक्षीणवलःसन्नित्यवीप्सयेतिनित्यार्थेद्विर्भावः। शिखरिषुपर्वतेषुपदंन्यस्यनिक्षिप्यपुनर्वलब्धाभार्थंक्वचिद्विश्रम्येत्यर्थः। क्षीणः क्षीणोभीष्णं कृशोगःसन्। अत्रापिकृदंतत्वात्पूर्ववद्द्विरुक्तिः। स्रोतसांपरिलघुरुचदोषरहितमुपलास्फालनोक्षपविछेदैःखंदितोदकाः हिमवन्मलयोद्भूताःपथ्यानद्योभवंत्यमूरितिपथ्यः। पानीयमुपभुज्यशरीरशोषणार्थमभ्यवहृत्यगंतासिगमिष्यसि। गमेर्लृट् ॥१३॥ अद्रेः शृंगंहरतिपवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितंमुग्धसिद्धांगनाभिः। स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खंदिङ्नागानांपथिपरिहरन्स्थूलहस्तावलेपान् ॥१४॥ अद्रेरिति। पवनोवायुरद्रेश्चित्रकूटस्यशृंगंहरतिकिंस्वित्किंस्विच्छब्दाविकल्पवितर्कार्थेदिवादिषुपठितः। इतिशं। कयाउन्मुखीभिरुन्नतमुखीभिः। स्वांगाच्चोपसर्जनादसंयोगोपधादितिङीषु। मुग्धाभिर्मूढाभिः मुग्धःस्फेदरमूढयोरित्यमरः। सिद्धानांदेवयोनिविशेषाणांगनाभिः। चकितचकितंचकितप्रकारंयथातथा। प्रकारेगुणवचनस्येतिद्विर्भावः दृष्टोत्साहः दृष्टोद्योगः सन्। सरसाः आर्द्राःनिचुलाः स्थलवेतसायस्मिन्तस्मात्। वानीरकविभेदस्यान्निचुलः स्थलवेतसइतिशब्दार्णवे

अस्मात्स्थानादाश्रमात्पथिनोमार्गेदिग्नागानांदिग्गजानांस्थूलायेहस्ताःकरास्तेषामवलेपानाक्षेपान्परिहरन्॥ ह
स्तानक्षत्रभेदस्यात्करभकरयारपीतिविश्वः॥ अवलेपस्तुगर्वस्यात्स्पृणदूषणपिचेतिविश्वः॥उदङ्मुखः सन्नलका
याउदीच्यत्वादित्याशयः॥स्वमाकाशंप्रत्युत्पतउड्डीय॥अत्रेदमपिअर्थांतरंध्वनयति॥रसिकानिचुलानामहाकविः का
लिदासस्यमहाध्यायःपरापादितानांकालिदासप्रबंधदूषणानांपरिहर्त्तायस्मिन्स्थानेतस्मात्स्थानात्उदङ्मुखानिदूषि
तादुन्नतमुखःसन्॥ पथिसारस्वतमार्गेदिङ्नागानां॥ पूजायांबहुवचनम्॥ दिग्नागाचार्यस्यकालिदासप्रतिपक्षस्या
वलेपान्हस्तविन्यासपूर्वकाणिदूषणानिपरिहरन्॥अवलेपस्तुगर्वस्याल्पिपनेदूषणेपिचेतिविश्वः॥अंडरट्टिक
ल्पस्यदिग्नागाचार्यस्यश्रृंगंप्राधान्ये॥श्रृंगंप्राधान्यसान्वोरित्यमरः॥हरतिकिंस्वदितिहेतुनासिद्धेःसारस्वतसिद्धेः
महाकविभिरंगनाभिश्चदृष्टोत्साहःसन्नवेउत्पतउच्चैर्भवतिस्वप्रबंधमात्मानंवाप्रतिकवेरुक्तिरिति॥संसर्गतो
दोषगुणाभवंतीतिचेन्मृषायेनजलाशयेपिस्थित्वानुकूलनिचुलश्चलेतमात्मानमारूक्षतिसिंधुवगादित्यतच्छा
कनिर्माणात्तस्यकवेर्निचुलसंज्ञत्वाद्धः॥१४॥रत्नच्छायाव्यतिकरइवप्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्रभवति धनुः
खंडमाखंडलस्य॥ येनश्यामंवपुरतितरांकांतिमापत्स्यतेतेबर्हेणेवस्फुरितरुचिनागोपवेषस्यविष्णोः॥१५॥
रत्नेति॥रत्नच्छायानांपद्मरागादिमणिप्रभाणांव्यतिकरोमिश्रणमिवप्रेक्ष्यंदर्शनीयमाखंडलस्येंद्रस्येदंधनुःखंड
मितिहस्तनिर्देशोविवक्षितः॥पुरस्तादग्रेवल्मीकाग्राद्दामूरुविवरात्॥वामोरूरुश्चनाकुश्चवल्मीकेपुनपुं
सकमित्यमरः॥प्रभवतिआविर्भवति॥येनधनुःखंडेनेनतवश्यामंवपुःस्फुरितरुचिनाउज्वलकांतिनाबर्हेणापिं
छेन॥पिंछंबर्हेनपुंसकमित्यमरः॥गोपवेषस्यविष्णोर्गोपालकृष्णस्यश्यामेवपुषिवातितरांकांतिंशोभामापत्स्य
तेप्राप्स्यते॥१५॥त्वय्यायत्तेकृषिफलमितिभ्रूविकारानभिज्ञेत्यादिस्निग्धैर्जनपदवधूलोचनैःपीयमानः॥ ॥९॥
सद्यःसीरोत्कर्षणसुरभिक्षेत्रमारुह्यमालंकिंचित्स्वाद्वंजलघुगतिर्भूयएवोत्तरेण॥१६॥त्वयीति॥कृषेर्हलक

र्षणःफलंसस्यंत्वयि॥अधिकरणविवक्षायांसप्तमी॥आयत्तमधीनं॥अधीनोनिम्नआयत्तइत्यमरः॥तस्मिंस्नेह
रक्तेमित्रेमार्दवमित्यर्थः॥भ्रूविकाराणांभ्रूविलासानामनभिज्ञैःपामरत्वादितिशेषः॥जनपदवधूनांपल्लीयोषितांलोचनैः
पीयमानःसन्सादरंवीक्षमाणःमालेमाल्यारव्येक्षेत्रेशैलप्रायेमुन्नतस्थले॥मालमुन्नतभूतलमित्युत्पलमालायास
द्यस्तत्कालंभवंसीरंहलेनकर्षणेनकरभिघ्राणतर्पणयथातथाआरुह्यतत्रापिदृष्टेत्यर्थःकरभिघ्राणतर्पणमित्यम
रः॥किंचित्यश्चाद्व्रजगछ॥लघुगतिस्तत्रनिदर्शनमाह॥लघुक्षिप्रमरंद्रुतमित्यमरः॥भूयःपुनरपिउत्त
रेणैवउत्तरमार्गेणैवव्रजत्तृतीयाविधानेप्रकृत्यादिभ्यउपसंख्यानात्तृतीया॥यथाकश्चिद्बकुलभूःपतिःकुत्रचि
त्क्षेत्रेकलत्रेगूढंविलल्यक्षेत्रेशरीरेकेदारमिहस्थानकलत्रयोरितिविश्वः॥दाक्षिण्यमंगमभ्यर्च्यनीचमार्गेणानि
र्गत्यपुनःसर्वोध्यक्षइवसंचरतितद्वदितिध्वनिः॥१६॥त्वामासारप्रशमितवनोपप्लवंसाधुमूर्ध्नावक्ष्यत्यध्वश्रमप
रिगतंसानुमानाम्रकूटः॥नक्षुद्रोपिप्रथमसुकृतापेक्षयासंश्रयायप्राप्तेमित्रंभवतिविमुखःकिंपुनर्यस्तथोच्चैः॥१७॥
त्वामिति॥आम्रान्स्रुताःकूटेषुशिखरेषुयस्यसआम्रकूटोनामसानुमान्यवर्त्तः॥आम्रस्रुतोरसालइत्यमरः॥कूटोस्त्री
शिखरंशृंगमित्यमरः॥आसारोधारावृष्टिःधारासंपातआसारइत्यमरस्तेनप्रशमितोवनोपप्लवोदावाग्निर्येनतंकृता
पकारमित्यर्थः॥अध्वश्रमेणपरिगतंप्राप्तंत्वांसाधुसम्यग्मूर्ध्नावक्ष्यतिवोढावहर्लङ्तथाहि॥क्षुद्रःकृपणोपि॥क्षु
द्रोदरिद्रकृपणेनृशंसइतियादवः॥संश्रयायसंश्रयणायमित्रंसुहृदि॥अथमित्रंसखासुहृदित्यमरः॥प्राप्तआगतेम
थमसुकृतापेक्षयापूर्वोपकारापेक्षयाविमुखोनभवतियस्तथातेनप्रकारेणान्यतः सचाम्रकूटोभिमुखोभवती
तिकिंवक्तव्यं॥एतेनप्रथमावसंथेमोरव्यलाभात्तेकार्यसिद्धिरस्तीतिस्मृचितं॥तदुक्तंनिमित्तनिदाने॥प्रथमावसंथे
यस्यमोरव्यंतस्यारिक्लेध्वनि॥शिवंभवतियात्रायामन्यथात्वशुभंध्रुवमिति॥१७॥छन्नोपान्तःपरिणतफलद्योति
भिःकाननाम्रैस्त्वयारूढेशिखरमचलःस्निग्धवेणीसवर्णे॥नूनंयास्यत्यमरमिथुनप्रेक्षणीयामवस्थांमध्येश्यामः
स्तनइवभुवःशेषविस्तारयापांडुः॥१८॥छन्नेति॥हेमघपरिणतैःपरिपक्वैःफलैर्द्योतंतइतितथोक्तैःआषाढव

नचूताः फलंतिप-च्यंतेचेमघवातेनेत्याशयः॥ काननाम्रेर्वनचूतेश्छनोपान्तः आवृतपार्श्वो चलआम्रकूटारव्यः॥
स्निग्धवर्णासवर्णमसृणकेशवेधश्छायेश्यामवर्णइत्यर्थः॥ वर्णीतुकेशवेधेजलरूक्षतावितियादवः॥ त्वयिश्रृंग
शिखरमारूढसति॥ यस्यचभावेनभावलक्षणमितिमसभी॥ मध्येश्यामोमध्यादन्यत्रशेषविस्तारपाण्डुः॥
हरिणः॥ हरिणःपांडुरःपांडुरित्यमरः॥ भुवस्तनइवामरमिथुनानांरवेचरणाभितिभावः॥ प्रेक्षणीयादर्शनीयेन
वस्छोत्पनंयास्यति॥ मिथुनग्रहणं कामिनामेवस्तनत्वेनोत्प्रेक्षासंभवतीतिकृतंयथापरिश्रांतः कश्चित्कामीका
मिनीनांकुचकलशविश्रांतःसन्स्वपितितद्वद्भवानपिभुवानायिकायाःस्तनइतिध्वनिः॥ १८॥ स्थित्वातस्मिन्वन
चरवधूभुक्तकुंजेमुहूर्त्तंतोयात्सर्गादुत्तरगतिस्तत्परं वर्त्मतीर्णः॥ रेवाद्रेश्चयस्युपलविषमेविंध्ययोदवि
शीर्णाभक्तिच्छेदरिवविरचितांभूतिमंगेगजस्य॥ ३९॥ स्थित्वेति॥ हेमेघवनेचरंतीतिवनचराः॥तत्पुरुषकृति
बहुलमितिबहुलग्रहणादलुङ्नभवतितेषांवधूभिर्भुक्ताःकुंजालतागृहायत्रतस्मिन्निकुंजकुंजावाकुंजा
वेलतादिपिहितादरइत्यमरः॥ तत्रतनयनविनादास्तीत्यर्थः॥ तस्मिन्नाम्रकूटेमुहूर्त्तमल्पकाल॥मुहूर्त्तम
ल्पकालेस्याद्घटिकाद्वितयेपिचतिशब्दार्णवे॥ स्थित्वानतुचिरंकार्यविराधादितिभावः॥विश्रम्यतोयागात्सर्ग
णात्वमासारत्यक्तवर्षणाद्गुततरगतिर्लाघवाद्वातरंहितिक्षिप्रतरगतिःसन्ततस्मादाम्रकूटात्परंअनंतरंतत्परंवर्त्म
मार्गंतीर्णोतिक्रांतः॥ उपलैःपाषाणैर्विषमेविंध्यस्याद्रेःपादेविंध्यपादेप्रत्यंतपर्वते॥पादाःप्रत्यंतपर्वताइत्यमरः॥
विशीर्णासमंततोविस्तृमरो॥ रंतनकस्याश्चित्कामुक्याःप्रियतमचरणपातापिध्वन्यते॥रेवानर्मदा॥रेवातुन
र्मदासोमोद्भवामरवलकन्यकल्पमरः॥ गजस्यांगेशरीरभक्तयोरचनारेरवाइतियावत्॥ भक्तिर्नियंत्रणभा
गरचनायामितिशब्दार्णवे॥तासांछेदैर्भंगिभिर्भासिभिर्विरचितांभूतिंशृंगारमिवभासितमिववा॥ भूतिर्गोतंग
शृंगारजातोभस्मनिसंपदीतिविश्वः॥ द्रक्ष्यसि॥अयमपिमहास्तनयनकोतुकलाभइतिभावः॥१७॥तस्या

स्तिक्तैर्वनगजमदैर्वासितंवान्तवृष्टि र्जंबूकुंजप्रतिहतरयंतोयमादायगच्छेः॥ अंतःसारंघनतुलयितुंना

निलःशक्ष्यतित्वांरिक्तःसर्वोभवतिहिलघुःपूर्णतागौरवाय॥ २०॥ तस्याइति हेमेघवांतवृष्टिरुद्गीर्णवर्षःस
न्कृतवमनश्चच्यज्यतेत्तिक्तैःस्वगंधिभिस्तिक्तरसवद्भिश्चतिक्तोरसस्वगंधेचेतिविश्वः॥वनगजमदैर्वासि
तंस्फुरभितंभावितंचहिमवद्विंध्यमलयागजानोप्रभवाइतिविंध्यस्यगजप्रभवत्वादितिभावः॥ जंबूकुंजेःप्रति
हतरयंप्रतिबद्धवेगंस्खलपेयमित्यर्थः॥ एतेनलघुत्वकषायः भावनाचध्वन्यते॥तस्यारेवायाः तोयमादायगच्छेः
व्रज॥ हेघनमेघजंतः सारोबलंयस्यतंत्वामनिलआकाशवायुः शारीरश्चगम्यतेतुलयितुंनशक्ष्यतिशक्तो
नभविष्यति॥तथाहिरिक्तोंतःसारशून्यः सर्वोपिलघुर्भवतिघनंप्याभवतीत्यर्थः॥पूर्णतासारवत्तागौरवायाघ
नंप्यत्वायभवतीत्यर्थः॥अयमूवध्वनिः आदोवमनशोधितस्यपुंसःपश्चाच्छूभशीपणायालघु तिक्त कषायं
बृंहणानलुब्धबलस्यवातघ्नंपानस्यादितियथाहवाहटाः कषायाश्चाहिमारुतस्यविशुद्धश्लेष्मणोहिताः किमु
तिक्त कषायावायेनिसर्गात्कफापहाः कृतशुद्धेः क्रमात्पीतपेयादेः पथ्यभोजिनः॥वातादिभिर्नबाधास्यादिंद्रि
यैरिवयोगिनइति॥ २०॥नीपंदृष्ट्वाहरितकपिशंकेसरैरर्द्धरूढैराविर्भूतप्रथममुकुलाःकंदलीश्चानुकच्छम्॥ जा
ध्वारण्येष्वधिकसुरभिंगंधमाघ्रायचोर्व्याः सारंगास्तेजललवमुचःसूचयिष्यंतिमार्गम्॥ २१॥ नीपमिति॥
सारंगामतंगजाःकुरंगावाभृंगावा॥सारंगश्चातकेभृंगेकुरंगेचमतंगजइतिविश्वः॥अर्द्धरूढैरर्द्धकेशउद्गतैः
केसरैःकिंजल्कैर्हरितंपलाशवर्णंप॥ पलाशोहरितोहरिदित्यमरः॥हरितंचतत्कपिशंच॥श्यामःस्यात्कपिशो
धूम्रधूम्रलोकृष्णालोहितावित्यमरः॥श्यामवर्णमितियावत्॥ वर्णोवर्णेनेतिसमासः॥नीपंस्थलकदंबकुसु
मं॥अधस्थलकदंबकेनीपस्यात्पुलकइतिशब्दार्णवे॥दृष्ट्वासंप्रेक्ष्यविदित्वेतियावत्॥ तथाकच्छघनूपंघनुक
च्छं॥अव्ययंविभक्त्यर्थव्ययीभावः॥जलश्रायमनूपस्यात्पुंसिकच्छस्तथाविधइत्यमरः॥आविर्भूताःप्रथमा
स्तन्नामुकुलायासीताःकदली र्भूमिकदलीः॥ द्रोणीपर्णीस्निग्धकंदाकदलीभूमिकंदल्यपीतिशब्दार्णवे
जग्ध्वाभा॥ क्षयित्वा॥अ क्षेजग्धिरितिजग्धिरादेशः॥अरण्येषुअधिकसुरभिमितिघ्राणतर्पणंदग्धार

ण्यधितिपाठेदग्धमित्यधिकविशेषणमर्थवशात्केदलीश्चदष्टेवेत्यन्वयेाऽष्टव्यः उर्व्याभमर्गधमाधायजलललवमु
चोमघस्यमार्गंसूचयिष्यति अनुमापयिष्यति यत्रयत्रवृष्टिकार्यंनीपकुरुक्षमादिकंदृश्यतेतत्रतत्रचयादृष्टमि
त्यनुमीयतइत्यर्थः॥२१॥अंभोविन्दुग्रहणचतुरांश्चातकान्वीक्ष्यमाणाः श्रेणीभूताःपरिगणनयानिर्दिशं॥तोव
वलाकाः॥त्वामासाद्यस्तनितसमयेमानयिष्यंतिसिद्धाःसोत्कंठानिर्धियसहचरीसंभ्रमालिंगितानि॥२२॥
अंभइति॥प्रक्षिप्तमपिव्याख्यायते॥अंभोविंदूनांवर्षादर्विंदूनांग्रहणे॥सर्वंमहापत्तिचमेबुनश्चातकस्यतिभू
स्पृष्टोदकस्यतेपांगर्गहेतुत्वादंतरालेबर्स्तीकारेचतुरांश्चातकान्वीक्ष्यमाणाः कौतुकात्पश्यंतः श्रेणीभूतावहूपे
क्षीः॥अभ्रूतनङ्गावच्चि॥वलाकावकपंक्तीः परिगणनयाएकोहतिस्त्रइतिरव्यानेननिर्दिशंतोहस्तेनदर्शयं
तःसिद्धाःस्तनितसमयेगर्जितकालेसोत्कंठानिउत्कंठापूर्वकाणिप्रियसहचरीणांरत्नमेणालिंगितानि आ
साद्यस्वयंग्रहणाश्लेषसुखमनुभूयेणः॥त्वामानयिष्यंतित्वन्निमित्तंसुखवलाभस्यैतिभावः॥२२॥उत्पश्यामि
द्रुतमपिसखेमत्प्रियार्थंयियासोः कालक्षेपंककुभसुरभौपर्वतेपर्वतेते॥शुक्लापांगैःसजलनयनैःस्वागतीकृ
त्यकेकाःप्रत्युद्यातःकथमपिभवान्गंतुमाशुव्यवस्येत॥२३॥उत्पश्यामीति॥हेसखेमेघमत्प्रियार्थंयथातथा
द्रुतंक्षिप्रं॥लघुक्षिप्रमरंद्रुतमित्यमरः॥पिपासोःयातुमिछोरपियातेःसनेतादुपत्ययंतेनवककुभेःकुटजकुसु
मैःसुरभौसुगंधौककुभःकुटजोर्जुनइतिशब्दार्णवे॥पर्वतेपर्वतेविप्सायांद्विरुक्तिः॥कालक्षेपंकालवि
लंबं॥क्षेपोविलंबनिंदायामितिविश्वः॥उत्पश्यामिउत्प्रेक्षे॥विलंबंहेतुंदर्शयन्नाशुगमनंप्रार्थयतेशुक्लेति॥स
जलानिसानंदबाष्पाणिनयनानियेषांतैःशुक्लापांगैर्मयूरैः मयूराबर्हिणाबर्हीशुक्लापागःशिरवाबलइति
यादवः केकावाणी॥केकावाणीमयूरस्येत्यमरः॥स्वागत॥कृत्यस्वागतवचनीकृत्यप्रत्युद्यातः प्रत्युद्गतः॥म
यूरवाणीकृतातिथ्यइत्यर्थः॥भवान्कथमपियथाकथंचित्॥आशुगंतुंव्यवस्येत॥व्यवसायंकुरुतप्रार्थनलि ॥७॥

रुः॥शेषंपथमइतिपथमपुरुषःस्वागतीकृत्यकेकास्वीक्रियमाणस्यस्वागतपवनस्यप्रकृतपक्ष्मनोपयोगित्वात्सरिणा
मालंकारः॥तदुक्तंआरोप्यमाणस्यप्रकृतोपयोगित्वंपरिणामइति॥२३॥पांडुछायापवनवृत्तयः केतकैः सूचिभि
न्नैर्नीडारंभैर्गृहबलिभुजामाकुलग्रामचैत्याः॥त्वयासन्नेपरिणतफलश्यामजंबूवनांताःसंपत्स्यंतेकतिपयदिनस्था
यिहंसादशार्णाः॥२४॥पांडुरिति॥हेमघत्वय्यासन्नसन्निकृष्टेसतिदशार्णानामजनपदाःसूचिभिन्नैःसूचिषुकुरुक्षमाग्रेषु
भिन्नैर्विकसितैःकेतकीमुकुलाग्रैरिवसूचिःस्यादितिशब्दार्णवे॥केतकैः केतकीकुसुमैः पांडुछायापीतवर्णाः उपवनानां
वृत्तयः कंटकशाखावरणानियेषुतथोक्ताः॥ग्राचीनंग्रांततावृत्तिरित्यमरः॥तथाग्रहबलिभुजांकाकादिग्रामपक्षिणांनी
डारंभैः कुलायनिर्माणैः कुलायोनीडमस्त्रियामित्यमरः॥चित्यायाइमानिचैत्यानिरथ्यावृक्षाः॥चैत्यमायतनेबुद्धिर्विवे
चोद्यानपाषंडयइतिविश्वः॥आकुलानिसंकीर्णानिग्रामेषुचैत्यानियेषुतेतथोक्ताः॥तथापरिणतैःपक्वैःफलैःश्यामा
नियानिजंबूवनानिंतरंतारम्याःभूतावर्षमितंरम्येसमाप्तावंतइष्यतेइतिशब्दार्णवे॥तथाकतिपयैर्वादिनैःस्थापि
नोहंसायेषुततथोक्ताएवंविधाःसंपत्स्यंतेभविष्यंति॥२४॥तांदिक्षुप्रथितांविदिशालक्षणांराजधानींगत्वासद्यः फ
लमविकलंकामुकत्वस्यलब्धा॥तीरोपांतस्तनितसुभगंपास्यसिस्वादुयुक्तंसभ्रूभंगंमुखमिवपयोवेत्रवत्याश्चलो
र्मि॥२५॥तेषामिति॥दिक्षुप्रथितांप्रसिद्धांविदिशेतिलक्षणंनामधेयंयस्यास्तांलक्षणानाम्निचिन्हेचेतिविश्वः॥तेषां
दशार्णानांसंबंधिनींराजधानींधीयंतेस्यामितिधानीकरणाधिकरणयोश्चेतिल्युट्कृद्योगात्षष्ठीसमस्यतदुक्ति
क्त्वात्समासः॥राज्ञांधानींराजधानींतांप्रधाननगरीं॥प्रधाननगरीराज्ञांराजधानीतिकथ्यतेइतिशब्दार्णवे॥गत्वा
प्राप्यसद्यः कामुकत्वस्यविलासितायाः विलासीकामुकः कामीस्त्रीपरारतिरितिशब्दार्णवे॥भविकलंसमग्रं
फलंलब्धालप्स्यतत्वपेतिशेषः कर्मणिल्युट्॥कुतःसद्यस्मात्त्वादृमधुरंचलाऊर्मयोयस्यतत्चलोर्मितरंगितं॥वेत्रव
त्याःनामनद्याःपयःसभ्रूभंगंभ्रूकुटिलयुक्तंदशनपदैर्यंतिभावः॥मुखमिवाधरमिवेत्यर्थः॥तीरायांतंतटप्रांतय
स्तनितंगर्जितंतेनसुभगंयथातथा॥स्तनितशब्देनमणितमपिध्वन्यतेऊर्ध्वमुच्चलितकंठनासिकंकुरुतेस्व

नितम्न्यघोषवदिति लक्षणात्॥ पास्यसि पिबतेर्लृट्॥ कामिनामधरास्वादः स्मरतादतिरिच्यते तृप्तिभावः ॥२६॥ नीचैरार्य्येगिरिमधिवसन्तत्र विश्रामहेतोस्त्वत्सेपक्वैस्तुल्यकिंतवमिव स्तोदपुष्पैः कदंबैः॥ यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥ २७॥ नीचैरिति हे मेघ तत्र विदिशासमीपे विश्रामः खेदापनयः भावार्थे घञ् प्रत्ययः॥ तस्येहेतुः तस्य विश्रामहेतोर्विश्रामकारणात् विश्रामार्थमित्यर्थः षष्ठीहेतुप्रयोगेऽतिषष्ठी॥ विश्रामेत्यत्र नोदात्तोपदेशस्य मोंतस्यानाचमेरितिपाणिनीये वृद्धिप्रतिषेधेपि विश्रामेतिचंद्रव्याकरणविकल्पनाद्वृद्धिविधानाद्रूपसिद्धिः॥ प्रौढपुष्पैः प्रबुद्धकुसुमैः कंदलैर्नीपवृक्षैः त्वत्संसर्गात्पुलकामस्यजातैः पुलकितमिव संजातपुलकमिव स्थितं॥ तारकादित्वादितच्प्रत्ययः॥ नीचैरारव्यायस्यते नीचैरार्य्ये गिरिमाधिवसेः गिरौ वसेरित्यर्थः॥ उपान्वध्याङ्वसइतिकर्मत्वं॥ यैर्नीचैर्गिरिः पण्याः केयाः॥ स्त्रियः पण्यस्त्रियोवेश्याः वारस्त्रीगणिकावेश्यापण्यस्त्रीरूपजीविनीतिशब्दार्णवे॥ तासांरतिपुष्पैः परिमलागंधविशेषः॥ विमर्दोत्थपरिमलोगंधेजनमनोहरइत्यमरः॥ तमुद्गिरंत्याविर्भावयंतीतितथोक्तानितैः शिलावेश्मभिः कंदरैः नागराणांपौराणांउद्दामान्युत्कटानियौवनानिप्रथयतिप्रकटयति॥ उत्कटयौवनाः क्वचिदनुरक्ताः वारांगनाविभ्रमविहारा कांक्षिण्यामाद्यादिभयान्निशीथसमयेकंचनविविक्तंदेशमाश्रित्यरमंतेतत्रात्रबकुलमस्तीतिप्रसिद्धिः॥ अत्रोद्गारशब्दोगोणार्थत्वान्नजुगुप्सावहः प्रत्युतकाव्यस्यातिशोभाकरएवनिष्यूतोद्गीर्णवातादिगोणवृत्तिव्यपाश्रयम्॥ अतिसंदरमन्यत्ग्राम्यकक्षांविगाहत इति ॥२७॥ विश्रान्तःसन्व्रजवनेनदीतीरजातानिसिंचन्सुधानोनवजलकणैर्यूथिकाजालकानि॥ गंडस्वेदापनयनरुजाक्लांतकर्णोत्पलानांछायादानात्क्षणपरिचितःपुष्पलावीमुखानां॥ २७॥ तत्र्नीचैर्गिरौविश्रांतःसन्विनीताध्वश्रमःसन्॥ अथविश्रांतेरनंतरं वने भव्यं यानद्यस्तासांतीरेषु जातानि स्वयंरूढानि अकृत्रिमाणीत्यर्थः॥ नदन्नदीतिपाठे पुमान्स्त्रियेत्यकृशोपादुर्वारः॥ तेषांसुधानानामाराद्भ्राणो

संबंधीनियूथिकाजालकानिमागधीकुसुमसमुकुलानि॥ अथमागधीगणिकायूथिकेत्यमरः॥ कोरकजालककलिकाकुड्मलमुकुलानुल्यानीतिहलायुधः॥ नवजलकणैःसिंचन्नार्द्रीकुर्वन्नभ्रमिंचनेनार्द्रीकरणार्थत्वाद्धवड्व्यस्यकरणत्वंयत्नतुल्यकरणमर्थः॥ तत्रइवड्व्यस्यकर्मत्वंयथोरतःसिक्ताकुमारीषुकरेणनिषिंचनमिवामरतत्त्वचीत्यादि॥ एवंकरतीत्यादीनामपिरजःकिरतिमारुतः॥ अवाकिरन्वयाबद्धास्तेलाजैःपायोपितइत्यादिवदर्थभेदाश्रयेणनरजोलाजादीनांकर्मत्वकरणत्वेवेदितव्येनथागंडयोःकपोलयोःस्वेदस्यापनयनेनप्रमार्जनेनयारुजापीडाभिदादित्वादङ्प्रत्ययः॥ तयाकृतान्यानिभ्रूनानिकर्णोत्पलानियेषांतेषांपुष्पाणिलुनंतीतिपुष्पलाव्यः पुष्पापचायिकाः स्त्रियः कर्मण्यण्दिद्वाणञित्यादिनाडिपुत्रासांमुखानितेषांछायायाअनातपस्यदानात्कांतिदानेचध्वन्यते॥ छायात्वनातपेकांतावित्यमरः॥ कामुकदर्शनात्कामिनीनांमुखविकासोभवतीतिभावः॥ क्षणपरिचितः क्षणेसंसृष्टः सन्ननुचिरंव्रजगछ ॥ २७॥ वक्रपंथायदपि भवतःप्रस्थितस्योत्तराशोसौधोत्संगप्रणयिविमुखामास्मभूरुज्जयिन्याः॥ विद्युद्दामस्फुरितचकितैस्तत्रपौराङ्गनानांलोलापांगैर्यदि नरमसेलोचनैर्वंचितासि॥ २८॥ वक्रइति॥ उत्तराशामुदीचींदिशंप्रतिप्रस्थितस्यभवतः॥ पन्थाउज्जयिनीमार्गोवक्रोयदपिदूरायदपीत्यर्थः॥ विंध्यादुत्तरवाहिन्यानिर्विंध्यायाः प्राग्भागेकियत्यपिदूरस्थित्वाउज्जयिन्यादेवतायाउत्तरपथस्फूर्तिनिर्विंध्यायाःपश्चिमइतिवक्रत्वं॥ तथाप्युज्जयिन्याः विशालानगरस्य॥ विशालोज्जयिनीसमइत्यमरः॥ सौधानामुत्संगेषुउपरिभागेषुप्रणयःपरिचयः॥ प्रणयःस्यात्परिचयेयाच्ञायांसोत्कदर्पिचेतियादवः॥ तस्यविमुखःपराङ्मुखामास्मभूःनभवेत्यर्थः॥ स्मोत्तरलुङिति॥ चकारादाशीरर्थेलुङ्॥ नमाङ्योगइत्यडागमप्रतिषेधः॥ तत्रोज्जयिन्यांविद्युद्दाम्नांविद्युल्लतानांस्फुरितैश्चकितैर्भीतैर्लोलापांगैश्चंचलकटाक्षैःपौरांगनानांलोचनैर्नरमसेयदितर्हिवंचितःप्रतारितःस्याःजन्मवैफल्यंभवेदित्यर्थः ॥ २८॥ वीचिक्षोभस्तनितविहगश्रेणिकांचीगुणायाः संसर्प्यन्याःस्खलितसुभगंदर्शितावर्त्तनाभेः॥ निर्विंध्यायाःपथिभवरसाक्यंतरंसन्निपत्यस्त्रीणामाद्यंप्रणयवचनंविभ्रमाहिप्रियेषु॥ २९॥ संप्रत्युज्जयिनींगछतस्तस्यमध्येमार्गंनिर्विंध्यासंबंधमाह वीचीति॥

हंसरवपथिउज्जयिनीपथेवीचिक्षोभेणतरंगचलनेननर्त्तनितामुखगकर्त्तरिक्तःविहंगानोहंसानोश्रेणिःपंक्तिरवकोंचीगुणा
यस्मात्तस्याःस्खलितेनापस्खलनेनमंदस्खलितेनचस्फुभगंयथातथासंपन्नायाःप्रवहंत्यागच्छंत्याश्चतथादर्शितावक्रगति
ताआवर्त्तोभ्रसोभ्रमणावनाभिर्यस्याःस्यादावर्त्तोभ्रमोभ्रमइत्यमरः॥निःक्रांताविंध्यान्निर्विंध्यानामनदी॥निरादयःक्रां
ताद्यर्थपंचम्यंतिसमासः तस्यांद्याःसन्निपत्यसंगत्यरसोजलमस्त्यंतेरयस्यसः अन्यत्ररमनशृंगारेणास्त्यंतरंगव्याप्ता
भवजंतरंगोभवमर्वथातस्यारसमनुभवेत्यर्थः॥शृंगारादौजलेवीर्यस्फुवर्णाविषस्फुक्कयोः॥तिक्तादावमृतेचवनिर्या
सेपारसध्वनौआस्वादेचरसंत्राङ्कुरितिशब्दार्णवः॥ननुतत्रार्थनामंतरेणकथंतत्रानुभवोयुज्यतेइत्यतआहस्त्रीणामि
तिस्त्रीणांप्रियेषुविषयेविभ्रमोविलासएवाद्यंप्रणयवचनंप्रार्थनावाक्यंहिस्त्रीणामेषस्वभावोयद्विलासेरेरागप्र
काशनेननुकंठतइतिभावःविभ्रमश्चात्रनाभिसंदर्शनादिरुक्तएव॥२९॥वर्णीभूतप्रतनुसलिलासात्वतीतस्यसिं
धुःपाण्डुच्छायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः॥सौभाग्यंतेसुभगविरहावस्थयाव्यंजयंतीकार्श्यंयेनत्यजतिवि
धिनासत्वयेवोपपाद्यः॥३०॥निर्विंध्यायाविरहावस्थांस्मरचयनतत्पूर्णतांप्रार्थयते॥वर्णीति॥अवर्णीवर्णीभूतं
वर्णाकारंप्रतनुस्त्रोकृशंसलिलंयस्याःसातथोक्ता अन्यत्रवर्णीभूतंकेशपाशेनिचयोयस्यतां॥रुहंतीतिरुहाःइगुपधलक्ष
णःकप्रत्ययः॥तटंरुहापतरवस्तेभ्यःभ्रंशयंतीतितथोक्तैः जीर्णपर्णैःशुष्कपत्रैःपांडुछायापाण्डुवर्णा अतएववक्र
सुभगविरहावस्थयापूर्वोक्तप्रकारयाकरणेनअतीतस्यएनावंतंकालमतीत्यगतस्यत्रोषितस्येत्यर्थः॥तंतवसौभाग्यंसु
भगत्वंसुभगंमिध्यंतपूर्वपदस्यचत्सुभगयपदवृद्धिः॥व्यंजयंतीप्रकाशयंती॥सरवलुप्तभगापभगनाःकामयंतइतिभा
वः॥सापूर्वोक्तासिंधुनदीनिर्विंध्यार्त्रीनद्यानानदंसिंधुदेशभेदंबुधोगजइतिवज्रयंती॥येनविधिनाव्यापारेणकार्श्यंय
जतिसविधिस्त्वयेवोपपाद्यः कर्त्तव्यइत्यर्थः॥सविधिरकत्रसृष्टिरन्यत्रसंभोगस्तदभावनिबंधनत्वात्कार्श्यस्येतिभावः॥इयं
पंचमीमदनावस्था॥तदुक्तंरतिरहस्ये॥नयनप्रीतिःप्रथमाचित्तासंगस्तनाथुसंकल्पःनिद्राछेदस्तनुताविषयनिवृत्ति
स्त्रयानाशः॥उन्मादोमूर्छामृतिरित्येताःस्मरदशादशैवस्युरिति॥तामतीतस्येतिपाठमाश्रित्यसिंधुनामनद्येतरामिति ॥९॥

व्याख्यानंतुसिंधुर्नामकश्चिन्नदःकाश्मीरदेशस्तिनदीतुकुत्रापिनास्तीत्युपेक्ष्यमित्याचक्षते॥३०॥प्राप्यावन्तीमुदयन
कथाकोविदग्रामवृद्धान्पूर्वोद्दिष्टामनुसरपुरींश्रीविशालांविशालां॥स्वल्पीभूतेसुचरितफलेस्वर्गिणांगांगतानांशे
षैःपुण्यैर्हृतमिवदिवःकांतिमत्खंडमेकं॥३१॥प्राप्येति विदंतीतिविदाःइगुपधलक्षणःकः॥कसोवेद्यस्तस्यां
विदाः॥कारोलुप्तःषष्ठोदरादित्वात्साधुःउदयनस्यवत्सराजस्यकथानांवासवदत्ताहरणाद्युद्गतापारव्यानानांकवि
दास्तवज्ञाःज्ञानेषुयेवृद्धास्तेभ्यःतेषांसंतिपयंतान्उज्जयिनीतन्नामजनपदान्प्राप्यतत्रपूर्वोद्दिष्टांपूर्वोक्तांसौधोत्संगप्रणयवि
मुखेवामास्मभ्रूरुज्जयिन्याइत्युक्तांश्रीविशालांसंपद्युक्तां॥शोभासंपत्तिपद्मासकलक्ष्मीश्रीरितिविश्वःविशालांपुरीमुज्ज
यिनीमनुसरव्रज॥कथंभूतामवस्थितां॥सुचरितफलेस्वर्गापभोगलक्षणेस्वल्पीभूतेत्यल्पावशिष्टमतीत्यर्थः॥गां
भूमिंगतानांगोरिलाकुक्षिभिन्नीक्षमेत्यमरः॥पुनरपिभूलोकंगतानामित्यर्थः॥स्वर्गिणांस्वर्गवतांजनानांशेषैर्भुक्त
शिष्टैःसुकृतेर्हृतमानीतंस्वर्गार्थानुष्ठितकर्मविशेषाणांस्वर्गदानावश्यंभावादितिभावः॥कांतिरस्यास्तीतिकांतिम
दुज्वलंसारभूतमित्यर्थः॥एकंमुक्तादन्यत॥एकंमुख्यान्यकेवलाइत्यमरः॥दिवःस्वर्गस्यखंडमिवस्थितमित्युत्प्रे
क्षा॥एतेनाकांतसकलभूलोकनगरसौभाग्यसारत्वसुज्जयिन्याव्यज्यते॥३१॥दीर्घीकुर्वन्पटुमदकलंकूजितं
सारसानांप्रत्यूषेषुस्फुटितकमलामोदमैत्रीकषायः॥यत्रस्त्रीणांहरतिसुरतग्लानिमंगानुकूलःशिप्रावातःप्रि
यतमइवप्रार्थनाचाटुकारः॥३२॥दीर्घीकुर्वन्निति॥यत्रविशालायांप्रत्यूषेषुहर्मुखेषु॥प्रत्यूषोहर्मुखंकल्यमित्य
मरः॥पटुप्रस्फुटंमदकलंमदनाव्यक्तंमधुरं॥ध्वनौतुमधुरास्फुटंकलइत्यमरः॥सारसाणांपक्षिविशेषाणां॥सार
सोमिथुनंकामीगानर्हःपुष्करान्कयदतियादवः॥यद्वासारसानांहंसानां॥चक्रागःसारसोहंसइतिशब्दार्णवः॥कूजि
तंरुतंदीर्घीकुर्वन्संतानयन्नित्यर्थः॥यावद्धातेशब्दानुवृत्तिरितिभावः॥एतेनप्रियतमःस्व चाटुवाक्यानुसारिकी
डापक्षिकूजितंदीर्घीकुर्वन्नविच्छिन्नीकुर्वन्निति चगम्यते॥स्फुटितानांविकसितानांकमलानामामोदनपरिमलेन
सहयामैत्रीसंसर्गस्तेनकषायःसुरभिः॥रागइव्यकषायास्त्रीनिर्यासेसोरभरःसइतियादवः॥अन्यत्रविमर्दगंधीत्य

र्थः विमर्दोत्थपरिमलो गंधेजनमनोहरः। आमोदस्तु तिनिर्हारीत्यमरः॥ अंगानुकूलमोघात्स्करस्पर्शः॥ अन्यत्रगा
ढालिंगनदत्तगात्रसंवाहनइत्यर्थः॥ भवभूतिनाप्युक्तं॥ आशिथिलपरिरंभैर्दत्तसंवाहनानीतिसंवात्यंतचक्रुरतश्रां
ताः प्रियेयुवतयः एतत्कविरेववक्ष्यति॥ संभोगांतेममसमुचितोहस्तसंवाहनानामिति॥ शिश्नानामकाचिन्नवत्यान
दीतस्यावातः शिशिखातः शिश्नाग्रहणंशैत्यद्योतनार्थं॥ आर्थनास्करतस्ययाच्ञातत्रचाटुकरोतीतितथोक्तः॥ पुनःस्कर
तार्थंप्रियवचनप्रयोक्तेत्यर्थः॥ कर्मण्यण्प्रत्ययः॥ प्रियतमावल्लुभइवस्त्रीणांस्करतस्यानिसंभोगखेदंहरतिनु
दति॥ चाटूक्तिभिर्विस्मृतपूर्वखेदाः स्त्रियःप्रियतमार्थनासफलयंतीतिभावः॥ आर्थनाचाटुकारइत्यत्रखाण्डुत
नायिकानुनीतेतिव्याख्यानेस्करतग्लानिहरणान्नसंभवतितस्याःपूर्वस्करताभावात्पश्चात्तनस्करतग्लानिह
रणान्नेदानींतनकोपशमनार्थंचाटुवचनसाध्यमित्यपेक्षेवाचिनाविवेकिनामाज्ञातन्यासविकृतरवाण्डुत
र्व्याकषायितेतिदशरूपके॥३२॥ हारांस्तारान्तरलगुटिकानूत्कोटिशःशंखशुक्तीःशाल्यश्यामान्मरकतमणी
नुन्मयूरवधरान्हान्॥ दृष्ट्वायस्यांविपणिरचितान्विद्रुमांश्चांगनासंलक्ष्यंतेसलिलनिधयस्तोयमात्रावशेषाः
॥३३॥ इतःपरंत्रक्षिप्तमपिश्लोकत्रयंव्याख्यायते॥ हारानिति॥ यस्यांविशालायांकोटिशाविपणिषुपण्यवीथि
काःकविपणिःपण्यवीथिकेत्यमरः॥ रचितान्प्रसारितान्॥ इदंविशेषणंयथालिंगंसर्वत्रसंबध्यते॥ तारानुच्चहा
रान्॥ तारोमुक्तादिसंयुक्तोतरलगुटिकोमौक्तिकइतिविश्वः॥ तरलगुटिकानुमध्यमणीभूतमहारत्नान्॥ तरलोहार
मध्यगइत्यमरः॥ पिंडोमणौमहारत्नेगुटिकावृद्धपारददितिशाश्वतः॥ हारान्मुक्ताबलीःतथाकोटिशःशंखां
श्चशुक्तीश्चमुक्तास्फोटांश्चमुक्तास्फोटइत्यमरः॥ स्त्रियांशुक्तिःशंखःस्यात्कुबरस्त्रियामित्यमरः॥ शाल्यंबालतृणं
तद्धछ्यामानशाल्यंबालतृणंघासोयवसंतृणमज्जुनमित्यमरः॥ उन्मयूखधरोहान्उच्चतरपृथ्यंकुरान्मके
रतमणीन्गारुडरत्नानि॥ तथाविद्रुमाणांभंगान्प्रबालखंडांश्चदृष्ट्वासलिलनिधयःसमुद्रास्तोयमात्रम

वशेषायेषांतेतादृशाः॥ संलक्ष्यंते॥ तथानुमीयंतइत्यर्थः॥ रत्नाकराप्यतिरिच्यतेरत्नसंपद्भिरितिभावः॥३३॥
प्रद्योतस्यप्रियदुहितरंवत्सराजोजहारजहृमतालद्रुमवनमभूदत्रतस्यैवराज्ञः॥ अत्रोद्भ्रांतः किलनलगि
रिःस्तंभमुत्पाट्यदर्पादित्यागंतून्मथयतिजनायत्रबद्धोनभिज्ञः॥३४॥ प्रद्योतस्येति॥ अत्रप्रदेशेवत्सराजो
वत्सदेशाधीश्वरउदयनः॥ प्रद्योतस्यनामउज्जयिनीनायकस्यराज्ञः प्रियदुहितरंवासवदत्ताजहृजहार॥
अत्रस्थलेतस्यैवराज्ञःप्रद्योतस्यहेमंसोवर्णं तालद्रुमवनमभूत्॥ अत्रनलगिरिनामदंडदत्तस्तदीयाग
जोदर्पान्मदात्तंभमालानमुत्पाट्यउद्भ्रांतउत्प्लुत्यभ्रमणंकृतवान्॥ इतीत्थंभूताभिःकथाभिरित्यर्थः
अभिज्ञः पूर्वोक्तकथाभिज्ञः कविदाजनः आगंतून्देशांतरादागतान् औणादिकस्तुनप्रत्ययः बंधून्यत्रवि
शालायांरमयतिविनोदयति॥ अत्रभाविकालंकारः॥ तदुक्तं॥ अतीतानागतेयत्रप्रत्यक्षत्वेनलक्ष्यते॥ अत्यद्भुता
र्थकथनाद्भाविकंतदुदाहृतमिति॥३४॥ पत्रश्यामादिनकरहयस्यर्द्धिनोयत्रवाहाःशोलादग्रास्त्वमिवकरिणोवृ
ष्टिमन्तःप्रभेदात्॥ याधाग्रण्यःप्रतिदशमुखंसंयुगंतस्थिवांसःप्रत्यादिष्टाभरणरुचयश्चंडहासस्यसैन्याः॥३५॥
पत्रेति॥ हेजलदपत्रविशालायांवाहाहयाःपत्रश्यामाःपलाशवर्णाः अतएवर्द्धिनोवर्णतोवागत
श्चसूर्यश्चिकल्पातथाशोलादग्राःशोलवद्वृत्तनाःकरिणःप्रभेदान्मदस्रावाद्वृत्तास्त्वमिवदृष्टिमंतः अग्रंनयंतीत्य
ग्रण्यःसत्कहिषेत्यादिनाकिप्प्रत्ययोग्रामाण्यानयंतीतिवक्तव्यात्मत्वम्॥ योद्धानामग्रण्याभटश्रेष्ठाःसंयुगंयुद्धप्र
तिदशमुखमभिरावणांतस्थिवांसःस्थितवंतःअतएवचंडहासस्य॥ रावणास्तुवणानक्षतान्यंवाकाश्चिन्हानि
तेःचंडहासारावणासावसिमात्रेणापिचक्वचिदितिशाश्वतः॥ प्रत्यादिष्टाभरणरुचयःप्रतिविद्धभूषणकान्तयःशस्त्र
प्रहाराएववीराणांभूषणमितिभावः॥ अत्रापिभाविकालंकारः॥३६॥ जालोद्गीर्णैरुपचितवपुःकेशसंस्कारधूपै
र्धूर्त्वात्मानंशिरसिमिहिकासंनिरुद्धंत्वयापहारः॥ हर्म्येष्वस्याःकुसुमसुरभिष्वध्वखेदंनयेथाःपश्यन्मुग्धस्मितललि
तवनितापादरागांकितेषु॥३६॥ जालोद्गीर्णैरिति॥ जालोद्गीर्णंगवाक्षमार्गनिर्गतः॥ जालंगवाक्षआनायजाल

केकपटगणइतियादवः।केशसंस्कारधूपेर्वनिनाकेशवासनार्थैर्गंधद्रव्यधूपेरित्यर्थः॥अत्रसंस्कारधूपयोस्तादर्थ्येपि
पदार्थादिवत्त्वप्रकृतिविकारत्वाभावादस्वद्यामादिवत्षष्ठीसमासानचतुर्थीसमासः उपचितवपुपरिपुष्टशरीरः॥तथावे
धाबंधुरितिचत्रीत्याभवनशिखिभिर्गृहमयूरदत्तान्नत्यमेवोपहारउपायनंयस्मैसतथोक्तः॥उपायनमुपयात्युपहा
रस्तथापथेत्यमरः॥कुसुमेःसरभिषुसुगंधिषु॥ललितवनिताःसुंदरस्त्रियः॥ललितंत्रिषुसुंदरमितिशब्दार्णवे
तासांपादरोगणःतास्तारसनोकितेषुचिन्हितेषुहर्म्येषुधनिकभवनध्वस्याउज्जयिन्याःलक्ष्मींपश्यन्॥अथनाभ्र
गमनेनरवेदंक्लेशंनयेथाःअपनय॥३६॥भर्तुःकण्ठच्छविरितिगणेःसादरंवीक्ष्यमाणःपुण्यंयायास्त्रिभुवन
गुरोर्धाम्नश्चण्डीश्वरस्य॥धूतोद्यानंकुवलयरजोगंधिभिर्गन्धवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ३७
भर्तुरिति॥भर्तुःस्वामिनोनीलकण्ठस्यभगवतःकंगस्यवच्छविर्यस्यसइतिहेतोर्गणैःप्रथमैः॥गणस्तुगणनायो
स्यातगणशत्रमथेचयइतिशब्दार्णवे॥सादरंयथातथावीक्ष्यमाणःसन्नधिकयवस्तुसादृश्यादपिप्रियत्वंभवेदिति
भावः॥त्रयाणांभुवनानांसमाहारस्त्रिभुवनं॥तद्धितार्थेत्यादिनासमासः॥तस्ययुरोस्त्रैलोक्यनाथस्यचंडीश्व
रस्यकात्यायनीवल्लभस्यपुण्यंपावनंधाममहाकालाख्यंस्थानंयायाःगच्छ विध्यर्थेलिङ्॥श्रेयस्करत्वात्सर्वथा
गंतव्यमितिभावः॥उक्तंचस्कंदे॥आकाशेतारकंलिंगंपातालेहाटकेश्वरं॥मर्त्यलोकेमहाकालंदृष्ट्वाकामित
माप्नुयादिति॥नकेवलंमुक्तिस्थानमिदंकिंतुविलासस्थानमपीत्याह॥धूतेतिकुवलयरजोगंधिभिरुत्पलपरा
गगंधवद्भिस्तोयक्रीडासक्तनिरतानामासक्तानांयुवतीनांस्नानंस्नानीयंचंदनादि।करणेल्युट्स्नानीयं॥भर्वस्मा
न्मितियादवःतेनतिक्तैःकटुतिक्तकषायरूक्षसौरभैश्चभ्रकीर्तितइतिहेलायुधः सौगंध्यातिशयार्थं
विशेषणद्वयं।गंधवत्यानामनद्यास्तत्तल्यायामरुद्भिर्द्यूतोद्यानंकेलिकीडावनमितिधाम्नोविशेषणं॥३७॥
अथन्यस्मिन्जलधरमहाकालमासाद्यकालस्थातव्यंतेनयनविषयंयावदत्येतिभानुः॥कुर्वन्संध्याबलिपट
हतोयूलिनःश्लाघनीयामामंडाणाफलमविकलंलप्स्यसेगर्जितानां॥३८॥अपीतियुग्मं॥हेजलधरमहाका

लेनामपूर्वोक्तंचंडीश्वरस्थाने॥अन्यस्मिन्संध्यातिरिक्तेकालेआसाद्यप्राप्यतेतवस्थातव्यंत्वयास्थानव्यमित्यर्थः॥स्त्या
नोकर्तरिवेतिपक्षे॥यावद्यावताकालेनभानुःसूर्योनयनविषयदृष्टिपथमित्येति।भवतिक्रामति॥आस्तमयास्थातव्यमित्य
र्थः॥यावदित्यवध्यर्थे॥यावत्तावच्चसमाकल्पःसंधारणंइत्यमरः॥किमर्थमतआह॥कुर्वन्निति॥क्षपनीयांत्र
शस्यांश्लक्ष्णिनः॥शिवस्यसंध्यायांबलिपूजातत्पठहंताकुर्वन्संपादयन्॥आमंडाणामीषद्भीरणांगर्जितानामवि
कलमखंडंफलंलप्स्यसे प्राप्स्यसि॥लभेःकर्तरिलृट्॥महाकालनाथबलिपटहध्वनिनियोगात्तेगर्जितसाफल्ये
स्यादित्यर्थः॥३८॥पादन्यासक्वणितरशनास्तत्रलीलावधूतैरत्नच्छायाखचिभिश्चामरैःक्लान्तहस्ताः॥वेश्यास्त्व
दीयंनखपदमुखान्याप्यवर्षाम्बुबिन्दूनामाक्ष्येनत्वयिमधुकरश्रेणिदीर्घान्कटाक्षान्॥३९॥पादन्यासेरिति॥तत्र
संध्याकालेपादन्यासेश्चरणनिक्षेपैःहेतुभिःक्वणिताःशब्दायमानारशनायासांतास्तथोक्ताः॥क्वणितंरकर्मकत्वाद्भृत्यर्था
कर्मकेत्यादिनाकर्तरिक्तः॥लीलयाविलासेनावधूतैःकंपितैःरत्नानांकंकणमणीनांछाययाकान्त्यावचितावलयश्चाम
रदंडायषांतैः॥बालैश्चामरदंडेचजराविरलचर्मणीतिविश्वः॥वामैर्बालव्यजनैःक्लान्तहस्ताःएतनंदशिकंनृत्यंस्मृ
तिम्॥तदुक्तंनृत्यसर्वस्वेखड्गकंडुकवस्त्रादिदंडिकाचामरस्रजः॥वीणांचधृत्वायत्कुर्युर्नृत्यंतद्दंडिकंभवेदिति
वेश्यामहाकालनाथमुपेत्यनृत्यंत्योगणिकास्त्वनोनखपदेषुनखक्षतेषुसुखान्सुखकरान्॥सुखंहंतोसुखेसुखमित्य
मरः॥वर्षस्याग्रबिन्दून्स्वयंबिन्दून्वाप्यत्वयिमधुकरश्रेणिदीर्घान्कटाक्षान्पाठानामोक्ष्यंते॥परेरुपकृताःसंतःसद्य
प्रत्युपकुर्वतइतिभावः॥कामिनांदर्शनीयत्वलक्षणंशिवोपासनाफलंसद्योलप्स्यसइतिध्वनिः॥पश्चादुच्चैर्भुजतरु
वनंमण्डलेनाभिलीनःसांध्यंतेजःप्रतिनवजपापुष्परक्तंदधानः॥नृत्यारंभेहरपशुपतेरार्द्रनागाजिनेच्छांशान्ता
योगात्। शैलूषभावनास्मृतिरिति नोपपद्यते। भवनायाः स्मृतित्वप्रमाणाभावादनुभवायोगात्सादृश्या॥ यन्यासवैयर्थ्याच्च। विसदृशेपि सालग्नामहरिभावनादर्शनादित्यलंविस्तरेण ॥१६॥ रक्ताशोकश्चलकिसलयः केसरश्चात्रकान्तः प्रत्यासन्नो कुरबकदलैर्माधवीमण्डपस्य ॥ एकस्तस्याः स्तवमहमयावामपादाभिलाषी कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः॥ १७॥ रक्तेति। अत्रक्रीडाशैलेकुरबकाएववृत्तिरावरणं यस्यतस्य मधोर्वसंतेभवामाधव्यस्तासांमंडपस्तस्याभिमुक्तलतागृहस्य। अभिमुक्तः पुंड्रकेः स्याद्वासंतीमाधवीलते त्यमरः। प्रत्यासन्नोसन्निकृष्टो। चलकिसलयश्चलपल्लवः। अनेन दृष्टस्यपादताडनायप्राञ्जलिर्व्यज्यते। रक्ताशोकः रक्तविशेषणंतस्य स्मरोद्दीपकत्वादुक्तं। प्रसूनकेरशोकरक्तश्वेतारक्तइतिद्विधा। बकुलस्तिलकः श्वेतो। रक्तोत्रस्मरवर्द्धनइत्यशोककल्पेदर्शनात्। कान्तःकमनीयः केसरबकुलश्चअधकेसरबकुलाबकुलइत्यमरः। स्तइतिशेषः। एकस्तयोरन्यतरः प्राथमिकत्वादशोकइत्यर्थः। मयासहतवसख्याः स्त्रियायाइत्यर्थः। वामपादाभिलाषी। दोहदस्यछद्मनेत्यत्रापिसंबंधनीयो। सचाहंचाभिलाषिणावित्यर्थः। अन्यः केसरोदोहदोवृक्षादीनांप्रसवकारणे संस्कारइत्यो। तरुगुल्मलतादीनामकालेकुशलैः कृतं। पुष्पाद्युत्पादकं द्रव्यंदोहदः स्यात्तुतात्क्रियेतिशब्दार्णवो। तस्यछद्मनाव्याजेना। कपयः स्त्रीव्याजदंभापधयश्छद्मकैतवइत्यमरः। अस्यास्तवसख्यावदनमदिरांगंडूषमद्यंकांक्षतीति। मयासहत्यत्रापिसंबंधनीयो। अशोकबकुलयोः स्त्रीपादताडनंगंडूषमदिराचदोहदइति प्रसिद्धिः। स्त्रीणांस्पर्शात्प्रियेगुर्विकासंतिबकुलाः सीधुगंडूषसेकात्सादाघातादशोकस्तिलकःकुरबकोवीक्षणालिंगनान्मुखान्मेदारानर्मवाक्यात्पदमधुहसनाच्चपकोवक्त्रवातात्तुतोगीतान्नेमरुर्विकसतिचपुरानर्त्तनात्कर्णिकारः॥ १७॥ तन्मध्येचस्फटिकफलकाकांचनीवासयष्टिर्मूले बद्धामणिभिरनतिक्रोदवंशप्रकाशैः॥ तालैःसिंजावलयसुभगैर्नर्तितः कान्तयामेयामध्यास्ते दिवसविगमे

नीलकंठः सुहृद्वः॥ १८॥ तन्मध्यइति। किंचेतिचार्थः। तन्मध्येवृक्षवाटिकामध्येऽनतिक्रोदानामनतिक्रोगराणांवंशानांप्रकाशइवप्रकाशोयेषांतेस्फटरूपंवर्णफलकंयेषांमणिभिरकतशिलाभिर्मूलेबद्धाकृतवेदिकेत्यर्थः। स्फटिकमयेफलकंपीठंयस्याःसाकांचनस्यविकारः कांचनीसोवर्णीवासयष्टिर्निवासदंडोऽस्तीतिशेषः। सिंजाभूषणध्वनिःभूषणानांतुसिंजितमित्यमरः। भिदादित्वादङ्। सिंजाप्रधानानिवस्तुयानितैःसुभगारम्यास्तैस्तालैः करतलवादनैर्मम कान्तयानर्त्तितोवोयुष्माकंसुहृत्सखानीलकंठोमयूरः। मयूरोबर्हीनीलकंठोभुजंगभुगित्यमरः। दिवसविगमेसायंकालेयामयष्टिकामध्यास्तेयष्ट्यामास्तइत्यर्थः। अधिशीङ्स्थासांकर्मेतिकर्मत्वाद्द्वितीया। तत्रगारमित्यारभ्यपंचसप्तीकेघतिसमूहवस्तुवर्णनादुदात्तालंकारः। तदुक्तं। तदुदात्तं भवेद्यत्रसमृद्धं वस्तुकथ्यतइति। नचैषास्वभावोक्तिर्भाविकचात्रत्वयास्तिनवस्तुवर्णनात्व। अत्रतुकविप्रतिभात्यापितसंभाव्यमानैश्वर्यशालिवस्तुवर्णनादारोपितविषयत्वमितिताभ्यामस्यभेदइत्यलंकारसर्वस्वकारः ॥ १८॥ एभिस्साधोहृदयनिहितैर्लक्षणैर्लक्षयथाद्वारापांतेलिखितवपुषौशंखपद्मौचदृष्ट्वा॥ कांमच्छायंभवनमधुनामद्रियोगननूनंसूर्यापायेनखलुकमलंपुष्यतिस्वामभिख्यं ॥ १९॥ एभिरिति। हेसाधोनिपुणा। साधुसामर्थ्येनिपुणोवेतिकाशिकायोहृदयनिहितैरविस्मृतैरित्यर्थः। एभिःपूर्वोक्तैर्लक्षणैस्तारणादिभिरभिज्ञानैर्द्वारापान्तेएकवचनमविवक्षितंपार्श्वयोरित्यर्थः। लिखितवपुषौआकृतीयस्तोशंखपद्मानामनिधिविशेषौ। नेधर्नासेऽवधौभेदाः पद्मशंखावद्र्यानिधिरित्यमरः। दृष्ट्वाचनूनंसत्यमधुनेदानीं। अधुनेतिनिपातः। मद्वियोगेनममत्रवासेनक्षामच्छायंमन्दच्छायेऽत्सवोपरमात्। क्षीणकान्तिभवनंमद्वृत्तलक्षयथाः निश्चित्तया। तथाहि। सूर्यापायेसतिकमलंपद्मंस्वामात्मीयामभिख्यांशोभांशोः। अभिख्यानामशोभयोरित्यमरः। नपुष्यतिनोपचिनोति। खलुसूर्यविरहितंपद्ममिवपतिविरहितंगृहंनशोभतइत्यर्थः॥ १९॥ गत्वामद्यः कलभतनुतांशीघ्रसंपातहेतोः क्रीडाशैलप्रथमकथितं

रम्यसानोर्निषण्णः॥ अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिं॥ २०॥
निजगृहनिश्चयानन्तरं कृत्यमाह॥ गत्वेति॥ हेमघशीघ्रसंपातत्वेहेतुरस्तस्यशीघ्रवेशनार्थमित्यर्थः॥ षष्टीहेतुप्रयोगइतिषष्ठी॥ संपातः पतनवेगप्रवेशवेदसंविदरितिशब्दार्णवे॥ मद्यः सपदि कलभस्य करिपोतस्य तनुरिवतनुर्यस्य तस्यभावस्तत्ता मल्पशरीरतागता प्रथमकथितेनस्यात्तीरइत्यादिनाग्रेवाहिष्टैरम्यसानोनिषीदनयोग्यइत्यर्थः॥ क्रीडाशैलेनिषण्णः उपविष्टः सन् अल्पाल्पप्रकाराभाः प्रकाशायस्यास्तां॥ प्रकारगुणवचनस्येतिद्विरुक्तिः॥ खद्योतानामालिस्तस्याविलसितेननिर्भासमानां॥ विद्युदुन्मेषाविद्युत्प्रकाशःसएवदृष्टिस्तां भवनस्योतरंतर्भवनंतत्रपतितांप्रविष्टांकर्तुमर्हसि॥ यथाकश्चित्किंचिदन्विष्यन्क्वचिदुन्नतेस्थित्वाशनैःशनैरतितरांडायीयसींदृष्टिमिष्टदेशंपातयतितद्वदित्यर्थः॥ २०॥ नन्वीश्यामाशिखरिदशनापक्वबिंबाधरोष्ठीमध्येक्षामाचकितहरिणीप्रेक्षणानिम्ननाभिः॥ श्रोणीभारादलसगमनास्तोकनम्रास्तनाभ्यांयातांमन्ये युवतिविषयेसृष्टिराद्येवधातुः॥ २१॥ संप्रतिदृष्टिपातफलस्याप्रिज्ञानेश्लोकद्वयेनाह॥ तन्वीति॥ तन्वीकृशोगीनतुपीवरीश्लक्ष्णेदन्त्येकृशंतन्वित्यमरः॥ वातोगुणवचनादितिङीप्॥ श्यामायुवतीः॥ श्यामायौवनमध्यस्थेत्युत्पलमालायां॥ शिखरोण्यदशनासंतीतिशिखरिणः कोटिमन्तः॥ शिखरंशैलदक्षाग्रेकक्षापुलिनकादिषुइतिविश्वः॥ शिखरिणीदशनादंतायस्याःसा॥ एतेनास्याभाग्यवत्त्वंपत्यापुष्करत्वंचसूच्यते॥ तदुक्तंसामुद्रिके॥ स्निग्धाःसमानरूपास्सुश्लक्ष्णशिखरिणःश्लिष्टाः दंताभवन्तियासांतासांपादेजगत्सर्वम्॥ तांवृत्तरसरक्तावास्फुटभासःसमोदयाः॥ यस्याःशिखरिणोदंताश्चिरंजीवतितत्पतिरिति॥ पक्वंपरिणतंबिंबंबिंबिकाफलमिवाधरोयस्याःशाकपार्थिवादित्वान्मध्यपदलोपीसमासइतिवामनः॥ नासिकोदरोष्ठेत्यादिनाङीप्॥ मध्येक्षामाकृशोदरीत्यर्थः॥ चकितहरिण्याःप्रेक्षणानीवप्रेक्षणानिदृष्टयोयस्याःसातथोक्ता॥ एतेनास्याः पद्मिनीत्वंव्यज्य

तेनदुक्तं॥ रतिहरस्येपद्मिनीलक्षणमवचकितमृगदृशांमे प्रान्तरक्तेनेत्रइति निम्ननाभिर्गंभीरनाभिः॥ अनेननारीणांनाभिगांभीर्यान्मदनातिरेकइतिकामसूत्रार्थःसूच्यते॥ श्रोणीभारादलसगमनामंदगामिनी॥ नतुजघनदोषात्॥ स्तनाभ्यांस्तोकंस्वाईषदवनता॥ नतुवपुर्दोषात्॥ युवतयएवविषयस्तस्मिन्न युवतिरधिकृत्येत्यर्थः॥ धातुर्ब्रह्मणआद्यासृष्टिः प्रथमशिल्पमिवस्थितेत्युत्प्रेक्षा॥ प्रथमनिर्मितायुवतिरियमेवेत्यर्थः॥ प्रायेणशिल्पीनांप्रथमनिर्माणेप्रयत्नातिशयवशाच्छिल्पनिर्माणसौष्ठवंदृश्यतइत्याद्यविशेषणं॥ तथाचास्मिन्प्रपंचेनकुत्राप्येवंविधरामणीयकंरमणीरत्नमस्तीतिभावः॥ तदेवंभूतायास्त्वांतत्रान्तरभुवनेस्यात्॥ तत्रवसेदित्यर्थः॥ तामित्युत्तरश्लोकेनसंबंधः॥ १९॥ तांजानीथाः परिमितकथांजीवितंमेद्वितीयंदूरीभूतेमयिसहचरेचक्रवाकीमिवैकां॥ गाढोत्कंठंगुरुषुदिवसेष्वेषुगच्छत्सुबालांजातांमन्येशिशिरमथितांपद्मिनीवान्यरूपां॥ २२॥ तामितिसहचरेसहचारिणि॥ अनेनवियोगासहिष्णुत्वंव्यज्यते॥ मयिदूरीभूतेदूरस्थितेसतिसहचरेचक्रवाकेदूरीभूतेसतिचक्रवाकींचक्रवाकवधूमिवजातरत्स्त्रीविषयादेयोपधादिनिङीप्॥ परिमितकथांपरिमितवाचंएकांमकाकिनीस्थितांतामतर्भवनगतांमेद्वितीयंजीवितंजानीथाः॥ जीवितंतुल्यांमत्प्रियसीमवगच्छेत्यर्थः॥ तन्वीत्यादिपूर्वलक्षणेरितिशेषः॥ लक्षणानामन्यथाभावप्रमाणमाशंक्याहगाढेति॥ गाढोत्कंठंगाढबलविरहवेदनं॥ रागस्तल्लब्धविषयेवेदनामहतीतुया॥ संशोषणीतुगात्राणांतामुत्कंठांविदुर्बुधाइत्यभिधानात्॥ बालांयुवतिं॥ गुरुषुविरहमहत्त्वंवर्त्तमानेषुदिवसेषुगच्छत्सुसत्सुशिशिरेणशिशिरकालेनमथितांपद्मिनींवापद्मिनींमिव॥ इवबद्वायथाइतिदंडी॥ अन्यरूपांपूर्वविपरीताकारांजातांमन्येहिमहतपद्मिनीवविरहेणान्यादृशीजातांतर्कयामीत्यर्थः॥ एतावतानेयमन्येनिम्नमितव्यमितिभावः॥ २२॥ नूनंतस्याःप्रबलरुदितोच्छूननेत्रंप्रियायानिश्वासानामशिशिरतयाभिन्नवर्णाधरोष्ठं॥ हस्तन्यस्तंमुखमसकलव्यक्तिलेखंबालकानांदिदीर्दैन्यंत्वदनुसृ

रणाक्लिष्टकोतेविभर्ति॥२३॥ नूनमिति॥अबलरुदितेनोच्छूनेस्फुरितपुटेनेत्रे यस्यतत्तथोक्तम्॥उच्छूनेतिनिश्चयेतःकर्त्तरिक्तः
ओदितश्चेतिनिष्ठानत्वं॥वचिस्वपीत्यादिनासंप्रसारणंसंप्रसारणाच्चेतिपूर्वरूपत्वं॥हलइतिहीर्घः॥निश्वासाना
मशिशिरतयाअन्तस्तापोष्णत्वेनाभिन्नवर्णाविच्छायाधरोष्ठोयस्यतत्॥हस्तेन्यस्तं॥एतेनचिंताव्यज्यते॥ल
ज्जाबालकत्वात्संस्कारभावाल्लुंबमानकुंतलत्वादसकलव्यक्तिअसंपूर्णाभिव्यक्तिर्यस्याःस्त्रियाःमुखंत्वदनुस्मरणे
नत्वदुपरोधेनक्लिष्टकान्तिरिदोदैन्येशोच्यतांबिभर्तिन्नूनमितिवितर्के॥न्नूनंतर्कार्थनिश्चयइत्यमरः॥पूर्ववत्तु
थापिनभ्रमितव्यमितिभावः॥२३॥आलोकेतनिपततिपुरासावलिंग्याकुलावामत्साद्दश्यंविरहतनुवाभावगम्य
लिखंतीं॥पृच्छंतीवामधुरवचनांशारिकांपंजरस्थांकच्चिद्भर्तुःस्मरसिरसिकेत्वंहितस्यप्रियेति॥२४॥सर्वबि
रहिणीसाधारणानिसंभावनयोत्प्रेक्ष्याणीत्याह॥आलोकेतित्रिभिः॥हेमघनामप्रिया॥वलिभुनित्येषुत्रोषितागमना
र्थेषुदेवताराधनेषुव्याकुलात्याप्तावा॥विरहेतनुकृशेभावगम्ये॥तत्काश्यंस्यादृष्टचरत्वात्संभृतिसंभावनयोत्प्रे
क्ष्यमित्यर्थः॥सत्सादृश्येसदाकारसाम्येसत्प्रतिकृतिमित्यर्थः॥यद्यपिसादृश्येनामप्रसिद्धवस्त्वेतरगतमाकारसा
म्यंतथापिप्रतिकृतित्वेनविवक्षितमितरथालेख्यत्वासंभवात्॥अक्ष्ण्यकोशेआलेख्यंचसादृश्यमित्यभिधानाच्च
लिखंतींक्वचित्फलकादौविन्यस्यंतीवाचित्रदर्शनस्यविरहिणीविनोदोपायत्वादितिभावः॥एतच्चकामशास्त्रसं
वादेनसम्यग्विवेचितमस्माभिरघुवंशसंजीविन्यां॥सादृश्यप्रतिकृतिदर्शनेःप्रियायाइत्यत्र॥मधुरवचनांमे
जुभाषिणीं॥अतएवपंजरस्थांहिंस्रेभ्यःकृतसंरक्षणामित्यर्थः॥शारिकास्त्रीपक्षिविशेषः॥हरसकभर्तुःस्वामि
नःस्मरसिकिंचित्कच्चित्कामयसेवदनेइत्यमरः॥भर्त्तारंस्मरसिकिमित्यर्थः॥अधीगर्थदयेषांकर्मणीतिकर्मणि
षष्ठी॥स्मरणेकारणमाह॥हियस्मात्कारणात्त्वं तस्यभर्तुः॥ह्रीणातीतिह्रियां॥इगुपधज्ञाधीकिरइतिकप्रत्ययः॥
अतःप्रेमास्यदत्वात्स्मर्तुमर्हसीतिभावः॥इत्येवंपृच्छंतीवावाशब्दोविकल्पे॥उपमायांविकल्पेचेत्यमरः॥तनवा २९

लोकेदृष्टिपथेपुरानिपततिसद्यःपतिष्यतीत्यर्थः॥स्यात्प्रबंधेपुरानीतेनिकटागामिकेपुरेत्यमरः॥यावत्पुरानिपातयोर्लि
तिलट्॥२४॥उत्संगेवामलिनवसनेसौम्यनिक्षिप्यवीणांमद्गोत्रांकंविरचितपदंगेयमुद्गातुकामा॥त्वंतींमार्द्रो
नयनसलिलैःसारयित्वाकथंचिद्भूयःस्वयमपिकृतांमूर्छनांविस्मरंती॥२५॥उत्संगेति॥हेसौम्यसा
धोमलिनवसनेप्रोषितमलिनाकृशेतिशास्त्रादित्यर्थः॥उत्संगेकरौवीणांनिक्षिप्यममगोत्रेनामांकःचिन्ह य
स्मिन्तन्मन्नामांकंयथातथा॥गोत्रेतुनाम्निकुलेपिचेत्यमरः॥विरचितानिपदानियस्यतत्तथोक्तंगेयंगानार्ह
प्रबंधादि॥गीतमितिपाठेसएवार्थः॥उद्गातुमुच्चैर्गातुंकामोयस्याःसा॥तुंकाममनसोरपीतिमकारलोपः॥देवयो
निस्नाङ्गोधारग्रामेणगातुकामत्यर्थः॥तदुक्तम्॥षड्जमध्यमनामानौग्रामौगायंतिमानवाः॥नतुगोधारनामानं
सलक्ष्यादेवयानिभिरिति॥तथानयनसलिलैःप्रियतमस्मृतिजनितस्रुभिरार्द्रांतींकथंचित्कृच्छ्रेणसारयि
त्वाआर्द्रत्वापहरणायकरेणप्रहृत्यान्यथाकृतामपिविस्मरणानर्हामपीत्यर्थः॥मूर्छनाचात्रक्रमविशेषविशि
ष्टास्थापना॥सामगेषुविलोमनन्यासपूर्वकाःपंक्तिस्वराणांस्थानानांमूर्छनासंज्ञाकीर्तिताइतिसंगीतरत्ना
करेविस्मरंतीवानिपतंतीतिपूर्वेणान्वयः॥२५॥शेषान्मासान्मनदिवसःस्थापितस्यावधेर्वाविन्यस्यंतीभुविगण
नयादेहलीदत्तपुष्पैः॥मत्संयोगंतेहृदयनिहितारंभमास्वादयंतीप्रायेणैतेरमणविरहेष्वंगनानांविनोदाः॥२६॥
शेषानितिं॥अथवाविरहस्यदिवसस्तस्यास्थापितस्यतत्तारक्ष्यनिश्चितस्यावधेरंतस्यशेषान्गतावशिष्टान्मा
सान्देहलीदत्तपुष्पैःदेहलीद्वारस्याधारदारु॥गृहावग्रहणीदेहलीत्यमरः॥तत्रदत्तानिराशित्वेननिहितापुष्पा
णितैर्गणनयाएकाद्वित्यादिसंख्यानेनभुविभूतलेविन्यस्यंतीवापुष्पविन्यासैर्मासान्गणयंतीवेत्यर्थः॥य
द्वाहृदयनिहितोमनसिकल्पितःआरंभउपक्रमोयस्यतं॥अथवाहृदयनिहिताआरम्भाःश्रुतनाट्यादयोव्यापारायस्य
तंमत्संयोगसंभोगेरतिमास्वादयंतीवा॥आलोकेनिपततीतिसंबंधः॥ननुकथमयंनिश्चयइत्याशक्यार्थान्तर
न्यासेनपरिहरति॥प्रायेणबाहुल्येनांगनानांरमणविरहेष्वनेनपूर्वोक्तविनोदाःकालयापनोपायाः॥एतेनसं

केल्यावस्थक्तनदुक्तं मंकल्यानाथविषयमनोरथदाल्दृतइति॥२६॥सव्यापारामहनिनतथापीरयंदिवेया
गःशंकरत्रीगुरुतरश्वचंनिर्विनोदांसखींते॥मत्संदेशैस्सुखयितुमलंपश्यसाध्वीनिशीथेतामुन्निद्रामव
निशयनोसंश्यवातायनस्थः॥२७॥सव्यापारामितिहेसखेऽहनिदिवसेसव्यापारांपूर्वोक्तवल्लिचिवल्ले
खनादिव्यापारवतींतेसखींस्वधियोविप्रयोगेमहिरहस्तथातेनप्रकारेण॥प्रकारवचनेथाल्लितिथाप्रत्ययः
नपीडयेत्॥यथारात्रावितिशेषतः किंतुरात्रौनिर्विनोदांनिर्व्यापारांतेसखीं॥गुरुतरश्वकुचयस्यांस्तामतिदुर्भ
रदुःखशोकां॥तर्कयामि॥शंकावितर्कभययोरितिशब्दार्णवे॥अतोनिशीथेऽहरात्रेरुन्निद्रामुत्सृष्टनिद्रां
भवनिरवशयनंशय्यायस्यास्तांनियमार्थंस्वेदलशायिनींसाध्वींपतिव्रतां॥साध्वीपतिव्रतेत्यमरः॥अतोना
न्यथाशंकितव्यमितिभावः॥तांत्वत्सखींमत्संदेशैमहार्त्तोभिरलंपर्याप्तैस्सुखयितुमानंदयितुंसंश्यवातायन
स्थःसन्॥पश्य॥सखाधार्त्तीचपितरोमित्रदूतश्वकादयः स्मरवयंतीष्टकथनस्मरंवापायेवियोगिनमिति॥
रत्नाकरे॥दूतश्चायंमेघइतिभावः॥अनेनजागरावस्थोक्ता॥२७॥आधिक्षामांविरहशयनेसन्निषण्णैकपार्श्वां
प्राचीमूलेतनुमिवकलामात्रशेषांहिमांशोः॥नीतारात्रिःक्षणइवमयासार्द्धमिच्छारतैर्यांतांमर्वांछंवि
रहमहतींमश्रुमियोपयंतीं॥२८॥पुनस्तांमवविशिनष्टि॥आधिक्षामामितिचतुर्भिः॥आधिनामनोव्यथयाक्षा
मांकृशां॥पुंस्याधिमानसीव्यथेत्यमरः॥क्षाम्यतेःकर्त्तरिक्तः॥क्षायोमदतिनिघातकारस्यमकारःविरहशय
नेतस्मिन्पल्लवादिरचितेइत्यर्थः॥सन्निषण्णमेकपार्श्वंयस्यास्तामतएवप्राच्याःपूर्वस्यादिशोमूलेउदयोद्रि
प्रांतइत्यर्थः॥प्राचीग्रहणंक्षीणावस्थाद्योतनार्थं॥मूलग्रहणंदृश्यत्वार्थंमेकलामात्रंकलेवशेषोयस्यास्तां॥हि
मांशोस्तनुमूर्त्तिमिवस्थितां॥तथायारात्रिर्मयासार्द्धंदृष्टयाकृतानिरतानितैः शाकपार्थिवादित्वान्मध्यमपदलो
पीसमासः॥क्षणमिवनीतायापितातान्तज्ञातीयामेवरात्रिंविरहेणमहतींमहत्वेनप्रतीयमानामुष्णैरश्रुभिर्यां

पयंतींयर्यांतर्य्यंताछत्रत्ययः आर्त्तिहीत्यादिनायुगागमः सएवकालः स्मरविनामत्यः॥प्रतीयतेदुःखिनो
तुविपर्यासइतिभावः॥एतेनकार्श्यावस्थोक्ता॥२८॥यादृनींदारमृतशिशिरान्जालमार्गप्रविष्टान्पूर्वंप्रीत्या
गतमभिमुखंसन्निवृत्तंतथैव॥चक्षुःखेदात्सलिलगुरुभिःपक्ष्मभिश्छादयंतींमांमेन्द्रीवस्थलकम
लिनींनप्रबुद्धांनसंभ्रं॥२९॥पादानितिजालमार्गप्रविष्टानावाक्षविवरगतान्अमृतशिशिरान्॥इंदोःपा
दान्नर्म्मानपूर्वंप्रीत्यापूर्वंस्नेहेनपूर्ववदानंदकरानभिविष्यंतीतिबुध्यंतिभावः॥अभिमुखंयथातथागतंतथैवसन्नि
वृत्तंयथागतंतथैवप्रतिनिवृत्तं॥तदातेषामतीवदुःसहत्वादितिभावः॥चक्षुर्दृष्टिं॥खेदात्सलिलगुरुभिरश्रु
भिरःपक्ष्मभिश्छादयंतीं॥अतएवसाध्वीदुर्दिनेऽह्निदिवसेनप्रबुद्धामघावरणादविकसितांनसंभ्रमंहरि
त्यमुकुलितोभयत्रापिनअर्थस्यनशब्दस्यसंभ्रमपतिसमासः॥स्थलकमलिनीवस्थितांएतेनविषयदृ
ष्टाव्याषष्टीदशास्यूचिता॥२९॥निश्वासेनाधरकिसलयंक्लेशिनाविक्षिपंतींशुद्धस्नानात्परुषमलकं
नूनमागंडलंबं॥मत्संभोगःकथमुपनयेत्स्वप्नजोपीतिनिद्रामाकांक्षंतींनयनसलिलोत्सीडरुद्धावकाशां
॥३०॥निश्वासेनेति॥शुद्धस्नानातेलादिरहितस्नानात्परुषंकटिनस्पर्शं॥नूनंनिश्वासनपूत्कारेण॥आगंडलंबं
मुखंपतिसमासः॥अलकंचूर्णकुंतलान्॥जातावेकवचनं॥अधरकिसलयंक्लेशयंतीति॥क्लिश्नातीतिवातथाकेनो
ष्ठेनेत्यर्थः॥क्लिशानिरण्यंतान्ताच्छील्यणिनिः॥निश्वासेननिक्षिपंतींचालयंतीं॥तथा॥स्वप्नजापिस्वप्नाच्चरुजाजन्यापि
साक्षात्संभोगासंभवादिभावः॥मत्संभोगःकथंकेनापिप्रकारेणोपनयेदागच्छेदितिमत्प्रतिशपः॥इतिनेवानार्थत्वा
दप्रयोगः॥प्रयोगावापोनरुक्तमित्यलंकारिकाः॥प्रार्थनार्थोलिङ्॥इतिनयनसलिलोत्सीडनाक्रुत्यारुद्धावकाशामा
क्रांतस्थानांदुर्लक्ष्यामित्यर्थः॥निद्रामाकांक्षंतींस्वप्नहेतुत्वादितिभावः॥अत्राश्रुविसर्जनेनलज्जात्यागोव्यज्यते॥३०॥
आद्यैवद्याविरहदिवसेयाशिरवादमाहित्वाशापस्यान्तंविगलितशुचातांमयोदन्वतीर्यांस्पर्शक्लिष्टामयमि

तनरेवनासक्तत्सारयंतींगंडाभोगात्कठिनविषमामेकवेणींकरेण॥३९॥ आद्यदति॥आद्येविरहदिवसेदाममालोहि
त्वात्यक्तकायाशिरवाबद्धाग्रथिताशापस्योतविगलितस्रुचावीतशोकेनमयादृष्टनीयो॥स्पर्शक्लिष्टोस्पर्शसहिमूल
केशेषुमव्यथामित्यर्थः॥कठिनाचसाविषमानिम्नोन्नताचतो॥एकवेणीमेकीभूतवेणी॥पूर्वकालेत्यादिनातत्पु
षःतोशिरवो॥अयमितोकेनेतिनोयान्तःनस्वायस्येतेनकरेणगंडाभोगात्॥कपोलविस्तारात्असकृच्युद्गमुंद्ग
मारयंतींअपसारयंतींतोपश्येतिपूर्वेणसंबंधः॥असकृत्सारणाच्चित्तविभ्रमदशामस्मिंचित्याह॥३९॥सामान्य
स्त्राभरणमबलापेशलंधारयन्तीशय्यासंगेनिहितमसकृद्दुःखदुःखेनगात्रं॥त्वामप्यस्त्रेनवजलमयं
मोचयिष्यन्यवश्यंप्रायःसर्वोभवतिकरुणावृत्तिरार्द्रान्तरात्मा॥३९॥मेति अबलादुर्बलामन्यस्त्राभरणंकृ
शत्वात्परित्यक्ताभरणं॥असकृदनेकशोदुःखदुःखेनदुःखप्रकारेण॥प्रकोरगुणवचनस्येतिद्विर्भावः॥शय्या
संगेनिहितंपेशलंमृदुसंगात्रंशरीरंधारयंतीवहंती॥अनेनात्यंताशक्त्यामूर्छावस्थामाह्यते॥सात्वत्सखीना
मपिनवजलमयेनबांधवरूपेअस्त्रबाष्पेअवश्यंसर्वथामोचयिष्यति॥द्विकर्मकपचादीनांचोपसंख्यानमिष्य
तइतिमुचेःपचादित्वाद्विकर्मकत्वं॥तथाहि॥प्रायःप्रायेणार्द्रान्तरात्मामृदुहृदयोमेघस्तद्वांतःशरीरः॥सर्वंकरु
णामयीवृत्तिरंतःकरणवृत्तिर्यस्यसःकरुणावृत्तिर्भवतिहियस्मादस्मिन्नवसरेसर्वथात्वयाशीघ्रंगंतव्यमनेनत
दशापरिहारायेतिसंदर्शाभिप्रायः॥ननुकिमिदमादिमोचक्षुःप्रीतिंमुपेष्यावस्थान्तरण्यंवतत्रभवान्कविरा
हतवान्उच्यते॥संभोगोविप्रलंभश्चद्विधा॥शृंगारउच्यते॥संयुक्तस्तुसंभोगोविप्रलंभोवियुक्तयोः॥१॥पूर्वानुरा
गमानाख्यप्रवासकरुणात्मना विप्रलंभश्चतुर्थात्रप्रवासस्तत्रचत्रिधा॥२॥कार्यतःसंभ्रमाच्छापादम्भिन्का
द्येनुशापजः॥आगसंगतयोर्यूनोस्म्पूर्वानुरंजनो॥३॥वक्ष्यःप्रीत्यादयोवस्त्वादशास्युस्तत्क्रमोयथा॥दृष्ट्वानःसंगमे
कल्पाजागरःकृशतारतिः॥४॥हीत्यागोन्मादमूर्छास्ताद्दृत्यनङ्गदशादशा॥पूर्वसंगतयोरेवप्रवासइतिकारणात्॥

ORIENTAL DAU

नतत्रापूर्ववच्चक्षुःप्रीतिरुत्पत्तिमर्हतिदृष्टसंगस्यतुसिद्धस्याप्यविच्छेदात्रवर्ण्यते॥४॥अनन्यापूर्ववद्वाच्याइतिवाक्यव
स्थितेः॥वियथ्यादादिमाहित्वावैरस्यादंतिमान्तथा॥५॥दृष्टसंगादीरिहाचक्षुर्विरहावस्थितिः॥मत्सादृश्यंवि
रवंतीतिपद्येम्स्मिन्प्रतिपादिता॥६॥चक्षुःप्रीतिरितिप्राक्तन्निरुक्तरक्तानतत्॥चक्षुःप्रीतिर्भवेच्चित्रंदृष्टेचरदर्श
नात्॥७॥यथामालविकारूपमग्निमित्रस्यपश्यतः॥प्राथितानोचमूर्च्छणांकदृष्टादृष्टपूर्वता॥८॥अथतत्रापिसं
देहेस्वकलत्राणिपृच्छतु॥किंभर्त्रप्रत्यभिज्ञास्याकिंवेदिशकभावना॥९॥प्रवासादागतस्त्वस्मिन्नित्यलंकल्पहेतु
था॥३२॥जानेसख्यास्तवमयिमनःसंभृतस्नेहमस्मादित्थंभूतांप्रथमविरहेतामहंतर्कयामि॥वाचालंमानंखलुसौ
भगंमन्यभावःकरोतिप्रत्यक्षंतेसकलमचिराद्भ्रातरुक्तंमयायत्॥३३॥नन्वीदृशीदृशामापन्नेविकथंत्वयानिश्चित
मुतआह॥जानइति॥हेमेघतवसख्यामनोमयिसंभृतस्नेहंसचितानुरागंजानेअस्मात्स्नेहज्ञानकारणात्प्रथमवि
रहेप्रथमग्रहणंदुःखातिशयद्योतनार्थं॥त्वत्सखीमित्यंभूतांपूर्वोक्तावस्थामापन्नांतर्कयामि॥ननुसौभगमानिना
मेषस्वभावोयदात्मनिस्त्रीणामनुरागप्रकरनेतत्राह॥वाचालमिति॥सौभगमात्मानंमन्यतइति आत्ममानेस्वश्च
तिस्वश्वप्रत्ययः॥अरुर्द्विषदित्यादिनामुमागमः तस्यभावः॥सौभगंमन्यभावःसौभगमानित्वंभावाचालंचबहुभाषि
णंनकरोतिस्वलु सोदर्याभिमानान्नप्रलपामीत्यर्थः॥स्याज्जल्पकस्तुवाचालोवाचाटोबहुगर्त्यवागित्यमरः
किंतुहेप्राणसमयोक्तंयदाधिक्षामेत्यादितत्सर्वमचिरात्तेप्रत्यक्षंभविष्यतीतिशेषः॥३३॥रूढापांगप्रसरमलकैरं
जनस्नेहशून्यंप्रत्यादेशादपिचमधुनाविस्मृतभ्रूविलासं॥त्वय्यासन्नेनयनमुपरिस्पंदिशंकेमृगाक्ष्यामीन
दोभाभ्यस्तंकुवलयश्रीतुलामध्यतीति॥३४॥रूढेति॥अलकैरूढा अपांगयोःप्रसरायस्यतत्तथोक्तं॥अंजने
नस्नेहःस्नेहाध्येतेनशून्यं॥अपिच॥किंच॥मधुनःमद्यस्यप्रत्यादेशात्प्रतिषेधाद्विस्मृताःभ्रूविलासाःयेनतत्तथोक्त
म्॥त्वय्यासन्नेसतिस्वकुशलवार्तांशंसिनीतिशेषः॥उपर्यूर्ध्वभागेस्पंदतेस्फुरतीत्युपरिस्पंदि तथानिमित्तनिदा

ने॥ स्यंदान्मूर्द्धि छत्रलक्षं भाले पट्टं शुभं भ्रुवि॥ दृष्ट्वानिर्देशरुद्भूमपाङ्के हानिमाप्नुयादिति॥ मृगाक्ष्याः प्रियायाः
नयनं वामगतिशीर्षः॥ वामभागरुक्नारीणां पुंसां श्रेष्ठरुक्दक्षिणः॥ दानेदेवादिपूजायां स्यंदेऽलंकरणेपि च॥ तिस्त्री
णां वामभागप्राशस्त्यात्॥ मीन[illegible]नीनचलनाच्चलस्याश्रियाशाभयातुलांसादृश्यमश्नुवतीतिशंकतेकयामि
तुल्यार्थैरतुल्योपमाप्योत्प्रेक्षतीत्याह॥ [illegible]त्प्रेक्षतीयाह॥३४॥ वामश्चास्याः करुरुहपदैर्मुच्यमानोमदीयैर्मुक्ताजालप्रति
चिरपरिचितत्याजितोदेवगत्या [illegible]लेममसमुचितोहस्तसंवाहनानोयास्यत्यूरुःसरसकदलीस्तंभगौ
रश्चलत्वं॥ ३५॥ वामइति॥ म[illegible]यदेर्नखपदैः पुनर्भवःकरुहानखराः स्त्रीनखराः स्त्रीयामित्य
मरः॥ मुच्यमानःपरिहीयमाणःनखै[illegible]इत्यर्थः॥ ऊर्वोर्नखपदास्यदलन्त्वरितहरेस्ये॥ कंठकुक्षकुचपा
र्श्वभुजोरः श्रोणिसक्थिषुनखास्यद[illegible]तिचिरपरिचितंचिराभ्यस्तंमुक्ताजालंमौक्तिकसरमयंकटिभूष
णंदेवगत्यादेववशेनत्याजितः संप्रतिनखपदाघाभावेनशीतोपचारस्यतस्यैवयर्थ्यादितिभावः॥ त्याजितर्पय
न्तात्कर्मणिक्तः॥ द्विकर्मकपचादीनांचोपसर्व्यानमिष्यतइति॥ पचादित्वाद्विकर्मकत्वंसंभागांतेममहस्तसं
वाहनानांहस्तेनमर्दनानां॰ संवाहनंमर्दनंस्यादित्यमरः॥ समुचितो॰ योग्यः सरसोयःपरिपक्वोनयुक्त श्च
सएवविवक्षितः तत्रैवपांडिमसंभवात्॥ सचासौकदलीस्तंभश्चसउरुगौरःयाएवरुः॥ गौरः करीरसिद्धार्थ
सुक्लेपीतेत्॥ रुणेपिचेतिमालतीमालायां॥ अस्याःप्रियायाः वामरुरुश्चलत्वंस्यंदनेयास्यतिप्राप्नोति ऊरोः
स्यंदाडतिविधादूर्वोः प्राप्तिरुक्वासमरतिनिमित्तनिदाने॥ ३६॥ तस्मिन्काले जलदयदिसालब्धनिद्रासुखा
स्यादन्वास्यैनोल्लसितविमुखेायाममात्रंसहस्व॥ माभूदस्याः प्रणयिनिमयिस्वप्नलब्धंकथंचित्सद्यः कंठ
च्युतभुजलतान्यंथिगाढोपगूढं॥ ३६॥ तस्मिन्निति॥ हे जलद तस्मिन्काले त्वदुपसर्पणकालेसामस्त्रियाः
लब्धंनिद्रासुखंयथासास्याद्यदिस्याच्चेत एनांनिद्राणामन्वास्यपश्चाद्वासिष्वत्यर्थः तत्रासीनः सन्॥ उपसर्ग

वशात्सकर्मकत्वंल्लसितविमुखेागर्ज्जितपराङ्मुखेनिःशब्दसन्॥ अन्यथानिद्राभंगःस्यादितिभावः यामम
त्रंप्रहरमात्रं॥ द्वौयामप्रहरौरात्रावित्यमरः॥ सहस्वप्रतीक्षस्वप्रार्थनायांलोट्॥ शक्तयोरकवारंकृतस्ययामवधिक
त्वात्स्वपितथाप्यविनव्यमित्यभिप्रायः॥ तथाचरतिरहस्येएकवारावधेर्यामोरतस्यपरोमतः॥ चंडशक्तिमतोर्यूनो
रुद्वंद्वकमवर्त्तिनोरितियामसहनस्यप्रयोजनमाह माभूदितिअस्याःप्रियायाः प्रणयिनिमयिमयिकथंचिन्कृच्छ्रे
णास्वप्नलब्धेसति॥ गाढोपगूढंगाढालिंगनं॥ नपुंसकेभावेक्तः सद्यःकेगात्रच्युतःस्रस्तोभुजलतयोर्ग्रंथिर्बंधोय
स्यतन्मानाभूत्मास्कंकथंचिल्लब्धस्यालिंगनस्यसद्योविघातोमाभूदित्यर्थः॥ नचात्रनिद्राक्लिष्टामुन्निद्रामितिपूर्वो
क्तेननिद्राच्छेदेनविरुध्यते॥ पुनःसप्तमा॥ यावत्सकर्मकपाक्षिकनिद्रासंभवात्॥ तथारसाकरे॥ अशक्तीगदनेनिद्रा
निर्लज्जाऽनर्थवाग्भवमः॥ सप्तमादिषुजायंतेदशाप्तेदेषुवासुचेति॥ ३६॥ तामुत्थाप्यस्वजलकणिकाशीतलेना
निलेनप्रत्याश्वस्तांसमभिनवजालकैर्मालतीनां॥ विद्युद्गर्भःस्तिमितनयनांत्वत्सनाथेगवाक्षेवक्तुंधीरःस्त
नितवचनैर्मानिनींप्रक्रमेथाः॥ ३७॥ तामिति॥ तांप्रियांस्वस्यजलकणिकाभिर्जलबिन्दुभिःशीतलेनानिलेना
श्याप्यबोध्य॥ एतेनतस्याःप्रभुत्वाद्युजनिनोलसमाधिर्व्यज्यते॥ यथाहभोजराजः॥ मृदुभिर्मर्दनैःपादौशी
तलैर्व्यजनैस्तनौ॥ श्रुतौचमधुरैर्गीतैर्निद्रातोबोधयेत्प्रभुमिति॥ अभिनवैर्नूतनैर्मालतीनां जालकैःसमंजा
तिकुड्मलैः सहक्रमनामालतीजातिः॥ साकंसत्रेसमंसह॥ क्षारकाजालकंक्रौंचकलिकाकोरकः पुमानित्यमरः
प्रत्याश्वस्तांशिशिलानिलसंपर्कात्पुनरुज्जीवितामित्यर्थः त्वसेः कर्त्तरिक्तः॥ उदितश्चेतिचकारादित्वतिषेधः
एतेनास्याः कुसुमसोकुमार्यंगम्यते त्वत्सनाथेत्वत्सहितेसत्यैनोप्रभुमित्याद्युः सहितेचिन्तनापिनीतिशब्दार्णा
वे॥ गवाक्षेत्विमितनयनांकोमार्वितिविस्मयनिश्चलनेत्रांमानिनींमनोचित्यप्रसंगासहिष्णुमितिभावः॥
विद्युद्गर्भान्तस्थेयस्यसः अन्तर्लीनविद्युत्कःसान्नित्यर्थः॥ गर्भोपवरकेन्तस्थेकुक्षिस्थेचाप्मकेमनइतिश

द्वार्णवे॥ दृष्टिप्रतिघातेन वक्त्रमुखावलोकनप्रतिबंधकत्वान्न विद्यातिनव्यमितिभावः धीरादृढः मनुभन्यथास्मवदि
नवादित्वेनानाश्वासप्रमंगादितिभावः॥ स्तनितान्येववचनानितैः वक्त्रेश्चक्रमथाः उपक्रमस्वित्यर्थः॥ प्रापाप्या
समर्थाभ्यामित्यात्मनेपदम्॥ ३९॥ भर्त्तुर्मित्रंप्रियमविधवेवि[illegible]हमामवाप्स्यसंदेशार्द्दयनिहितरागंत्वत्समीपं॥
यादृदानित्वरयतिपथिश्रम्यतांप्रापितानांमंदस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥ ४०॥ संप्रतिदूत
स्यश्रोतृजनाभिमुखीकरणचातुरीमुपदिशति॥ भर्त्तुरिति॥ विधवागतभर्त्तृकानभवतीत्यविधवसभर्त्तृके
अनेनभर्त्तृजीवनसूचनादनिष्टागमनशंकावारयति॥ मोभर्त्तुः तवपत्युः प्रियंमित्रंप्रियसुहृदं॥ तत्रापिहृदय
निहितैर्मनसि॥ स्थापितस्तत्संदेशोस्तस्यभर्त्तुः संदेशोस्तत्समीपमागतेभर्त्तृसंदेशकथनार्थमागतमित्यर्थः
अम्बुवाहमेघंविद्धिजानीहि॥ नकेवलमहंवार्त्ताहरः किन्तुघटकोपीत्याशयेनाहयोंबुवाहोमेघाः बलानोस्त्री
णांवेणयस्तासांमोक्षेमोचनेउत्सुकानिपथिश्राम्यतांप्राप्तिनामापन्नानांप्रोषितानांप्रवासिनांपांथानामित्यर्थः
तदानिसंद्यानमंद्रस्निग्धैर्गंभीरश्राव्यर्ध्वनिभिर्गर्जितैःत्वरयति॥ पांथोपकारिणोमेकिमुवक्तव्यंसुहृद्रू प
कारित्वमितिभावः॥ ३९॥ इत्याख्यातेपवनतनयंमैथिलीवोन्मुखीमात्मानमुत्कण्ठाध्वसितहृदया॥ वीक्ष्यसंभा
व्यचैव॥ श्रोष्यत्यस्मात्परमवहितासौम्यसीमंतिनीनांकांतोदंतःसुहृदुपगतःसंगमात्किंचिदूनः॥ ४०॥
भर्त्तृसख्यादिज्ञापनस्यफलमाह॥ इतीति॥ इत्येवमाख्यातेसतिपवनतनयेहनूमंतेमैथिलीवसीतेवसमान
त्वियाउन्मुखीउत्कंठयोत्कंठयेनाश्वसितहृदयाविकसितचित्तासतीत्वांवीक्ष्यसंभाव्यसत्कृत्यच॥ अस्मा
द्भर्त्तृमैत्रीज्ञापनात्परंसर्वंश्रोतव्येअवहिताअप्रमत्तासती श्रोष्यत्येव॥ अत्रसीताहनुमदुपमानादस्याःपति
व्रत्यंमेघस्यदूतगुणसंपत्तिश्चव्यज्यते॥ तदुणास्करसाकरे॥ ब्रह्मचारीबलीधीरोमायावीमानवर्जितः
धीमानुदारोनिःशंकोवक्तादूतःस्त्रियोभवेदिति॥ ननुवार्त्तामात्रश्रवणादस्याःकोलाभइत्याशंक्यार्थांतर्न्य

स्यति॥ हेसौम्यसाधोसीमंतिनीनांवधूनां॥ नारीसीमंतिनीवधूरित्यमरः॥ सुहृदासुहृन्मुखेनोपगतःप्राप्तःसन्
सुहृत्सदृविश्रब्धंशंकानिवारणार्थंकांतस्यादंतःवार्त्ताकांतोदंतः॥ वार्त्ताप्रवृत्तिर्वृत्तांतउदंतःस्यादित्यमरः सं
गमान्नकांतसंपर्काल्किंचिदूनः ईषदूनःतद्देवानंदकारीत्यर्थः॥ ३९॥ तामायुष्मन्ममचवचनादात्मनश्चोपक
र्तुंब्रूयाएवंतवसहचरोरामगिर्याश्रमस्थः॥ अव्यापन्नःकुशलमबलेपृच्छतित्वांवियुक्तः पूर्वाभाष्यंसुलभं
विपदांप्राणिनामेतदेव॥ ४०॥ संप्रतिसंदिशति॥ तामिति॥ हेआयुष्मन्प्रशस्तायोमतुपूपरोपकारश्लाघ्य
जीवितेत्यर्थः॥ ममवचनंप्रार्थनावचनं॥ तस्मादानःस्वस्योपकर्तुंपरोपकारेनात्मानंकृतार्थयितुमित्य
र्थः॥ उपकारक्रियोत्तरकालेपितस्यानुपकरोतीत्यादिवत्संबंधमात्रविवक्षायामात्मनइति॥ षष्ठीचनविरु
ध्यते॥ यथाहभारविः॥ सात्वत्प्रसूरुपकुरुतेवयापरेषामिति॥ तथाश्रीहर्षश्च॥ साधूनामुपकर्तुंलक्ष्मीरुष्टुविहायसा
गंतुं॥ नकृतघ्नलिकस्य मनश्चरितंचमहात्मनोश्रोतुमिति तथाचकश्चित्कंचिद्विहितोयादर्शनात्सर्वत्रतथेनाथवच
नमनाथवचनमेवत्वोपयोमेवंब्रूयाःकिमितिहृज्जवलनवसहचरोरामगिरेरिवचकूटस्याश्रमेपुतिष्ठतीतिरा
मगिर्याश्रमस्थः सन्॥ अव्यापन्नःनमृतइत्यर्थः वियुक्तोवियोगप्राप्तोदुःखीएवंविधःसन्तांकुशलंपृच्छति॥ डु
त्यादित्वात्पृच्छतेर्द्विकर्मकत्वं॥ तथाहि॥ स्कलप्राविपदांश्रयत्नसिद्धविपन्नानांप्राणिनांएतदेवकुशलमेवपूर्वंभा
व्यप्रथममवश्यंवक्तव्यं॥ कृत्याश्चेत्यावश्यकार्थेषयस्त्वत्ययः॥ ४०॥ भर्त्रुनोर्द्भृतनुतनुनागादतसनतसंसा
स्रंस्रुतमविरतोत्कंठमुत्कण्ठितेन॥ उष्णोच्छ्वासंसमधिकतरंछ्वासिनादूरवर्त्तीसंकल्पैस्तंविशतिविधिना
वैरिणारुद्धमार्गः॥ ४१॥ भर्त्रेनेति॥ किञ्च॥ दूरवर्त्तीदूरस्थः नचागंतुंशक्यतइत्याह॥ वैरिणाविरोधिनादेव
नरुद्धमार्गः॥ प्रतिबंधवत्त्वमस्तंसहचरः तनुनाकृशेनगाढतप्तेनात्यंतसंतप्तमास्रेणसाश्रुणाउत्कंठावे
दनाअस्यजातोत्कंठितंतेनोत्कंठितेना॥ तदस्यसंजातमित्यादिनाइतच्प्रत्ययः उत्कंठितवाक्यंरिक्त

समधिकतरमतिबलमुच्छ्वसतीति समधिकतरोच्छ्वसितेन॥ दीर्घनिश्वासिनेत्यर्थः॥ तार्च्छल्येणनिः अंगेनुख
शरीरेनुक्रशतनोर्वियोगदुःखेनपूर्वेमप्रक्रुतमश्रुकुर्वन्तं॥ अस्त्रमस्त्रंअपुलिंगोरोदनेत्वस्त्रमश्रुचत्य
मरः॥ अविरतोत्कंठमविच्छिन्नवेदनं॥ उष्णोष्णंसंतापेननिश्वासं॥ तिग्मंतीव्रंखरंतीक्ष्णंचंडमुष्णंसमंस्मृतमि
तिहलायुधः॥ अंगेनुदीयंशरीरंतैः स्वसंवेद्यैः सकल्पैर्मनोरथैर्विशत्येकीभवतीत्यर्थः॥ अत्रसमानुरागित्वद्योतना
न्नायकेयनायिकायाः स्वसमानावस्थत्वमुक्तं॥ ४१॥ शब्दरव्ययेयदपिकिलतेयः सखीनांपुरस्तात्कर्णेलोलः
कथयितुमधुदाननस्पर्शलोभात्॥ मीतिकोतः श्रवणविषयंलोचनाभ्यामदृश्यस्त्वामुत्कंठाविरचितप
दंमन्मुखेनेदमाह॥ ४२॥ संप्रतिस्ववस्थानिवेदनायप्रस्तौति॥ शब्दारव्ययमिति॥ हे॰ बलेयस्मात्प्रियः सखी
नांपुरस्तादग्रेआननस्पर्शेतन्मुखसंपर्केलोभात्कांक्षादधरपानलोभादित्यर्थः॥ शब्दारव्ययं शब्देनरवेणा
रव्येयंउच्चैर्वाच्यमपियत्तद्वचनमपीतिशेषः॥ कर्णेकथयितुंलोलोलालसोमुहुरितस्ततोलुठन्लोलो
लालसोलंपटोपिचेतियादवः॥ श्रवणविषयंकर्णपथंअतिक्रांतः॥ तथानलोचनाभ्यां॥ दृश्यः॥ अतिदूरत्वादश्रु
श्रोतुंचनशक्यइतिभावः॥ संप्रतिप्रियःत्वांउत्कंठयाविरचितानिपदानिकल्पितशब्दावाक्यानिवापस्यन्तयोक्त
पदंशब्दचवाक्यंचेतिविश्वः॥ इदंवक्ष्यमाणंश्यामास्वंगमित्यादिकंमन्मुखेनाह॥ मद्वचनेनसएवब्रूतेउत्प
र्थः॥ ४३॥ श्यामास्वंगंचकितहरिणीप्रेक्षणेदृष्टिपातंवक्त्रछायांशशिनिशिरुहेबर्हभारेषुकेशान्॥ उत्पश्या
मित्वतनुषुनदीवीचिषुभ्रूविलासान्हंतैकस्मिन्क्वचिदपिनतेचंडिसादृश्यमस्ति॥ ४३॥ सादृश्यप्रतिकृति
स्वप्नदर्शनानंतरंगस्पृष्टस्पर्शाख्याश्चत्वारोविरहिणोविनोदोपायाः॥ तथाचोक्तंगुणपताकायांवियोगेचा
योगप्रियजनसदृक्षानुभवनेततश्चित्रकर्मस्वपनसमायेदर्शनमपि॥ तदंगस्पृष्टानामुपगतवतांस्पर्शनम
पित्रतीकारोनंगव्यथितमनसोकोपिगदितइतितत्रसदृश्यवस्तुदर्शनमाह॥ श्यामास्विति॥ श्यामास्वंत्रि

यंगुलतास्वं॥ श्यामातुमहिलाबल्कयालतागौरीदिनीगुडाप्रियंगुः फलीनीफल्लीत्यमरः॥ अंगंशरीरमुत्पश्या
मि॥ सोकुमार्यादिसाम्यादंगमिति॥ तर्कयामीत्यर्थः॥ तथाचकितहरिणीनांप्रेक्षणेतदृष्टिपातं॥ शशिनिचंद्रे
वक्त्रछायांमुखकांतिं॥ तरुणशिखिनांबर्हिणांबर्हभारेषुबर्हसमूहेषुकेशान्॥ त्वतनुषुस्वल्पांगीषुनदीनांवी
चिषु॥ अत्रवीचीनांविशेषणोपादानेनानुक्तगुणग्रहदोषः॥ त्वसाम्यनिर्वाहायमहत्त्वदोषनिराकरणार्थत्वा
नस्यतदुक्तेरसरत्नाकरे॥ ध्वन्युत्थादगुणोत्कर्षभावोक्तौदोषवारणे॥ विशेषणाद्विशेष्यस्यनास्त्यनुक्तगुण
ग्रहइतिगुणविशेषणम्॥ भ्रूविलासान्भ्रूपताकाइतिपाठेभ्रुवःपताकाइवेत्युपमितिसमासः॥ उत्पश्या
मीतिसर्वत्रसंबध्यतेतथापिनास्तिमनोनिर्वृतिरित्याशयेनाहहंतेति॥ हंतविषादे॥ हंतहर्षेलुकेपायोवा
क्यारंभविषादयोरित्यमरः॥ चंडिकोपने॥ चंडस्त्वत्येतत्कोपनइत्यमरः गौरादित्वात्ङीषि॥ उपमानक
थनमात्रेणनकोपितव्यमितिभावः॥ कचिदन्यस्मिन्नपिवस्तुनितेतवसादृश्यंनास्तिअतोननिर्वृणोमी
त्यर्थः॥ अनेनास्याःसौंदर्यमनुपममितिव्यज्यते॥ ४३॥ त्वामालिख्यप्रणयकुपितांधातुरागैःशिलायामात्मा
नंतेचरणपतितंयावदिच्छामिकर्तुं॥ अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमेकूरस्तस्मिन्नपिनसहतेसं
गमंनौकृतांतः॥ ४४॥ संप्रतिप्रतिकृतिदर्शनमाह॥ त्वामिति॥ हेप्रियप्रणयेनप्रमातिशयेनकुपितोकुपितावस्था
युक्तोत्वत्प्रतिकृतिमित्यर्थः॥ धातवोगैरिकादयः॥ धातुर्वातादिशब्दादिगरिकादिवर्णजातिर्विनियादवः॥
तेएवरागारंजकद्रव्याणिचित्रादिरंजकद्रव्येलाक्षादौप्रणयेछलयोःसारंगोदाचारागस्तादारूप्यरंजनेषु
मानितिशब्दार्णवेतैर्धातुरागैःशिलायांशिलापट्टे॥ आलिख्यनिर्माप्यात्मानंमामत्प्रतिकृतिमित्यर्थः॥ तत्र
चित्रगतायाइत्यर्थः॥ चरणपतितंकर्तुंतथालिखितुंयावदिच्छामि॥ तावदिच्छासमकालंमुहुरुपचितैःपुनः
पुनरस्रैरश्रुभिःकर्त्रीभिः॥ मेमत्स्वमश्रुणिशाणितइतिविश्वः॥ मेदृष्टिरालुप्यतेआवियतइत्यर्थः॥ नोदृष्टिप्रतिबंधा

लुरवनेधतिवध्यतइतिभावः॥ किंवदन्नाक्रुरोघातुकः॥ नृशंसोघातुकः क्रूरइत्यमरः॥ क्रतोतोदेवा क्रतोतायम्
सिद्धोतदेवाकुशलकर्मस्वित्यमरः॥ तस्मिन्नपिचित्रे पिनोआवयोः युष्मदस्मदोः॥ षष्ठीचतुर्थीद्वितीयास्थयोर्वा
न्नावितिनावादेशः संगमंसहवासेनसहते॥ संगमक्लरवनमप्यावयोरसहमानेदैवमावयोः साक्षात्संगेनसहतइ
तिकिमुवक्तव्यमित्यपिशब्दार्थः॥ ४५॥ मामाकाशप्रणिहितभुजोनिर्दयाश्लेषहेतोर्लब्धायास्तेकथमपिमयास्वप्नसंदर्शनेषु॥ पश्यंतीनोनरवलुवधूशोनस्तनीदेवतानोमुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाःपतंति॥ ४६॥
अधुनास्वप्नदर्शनमाह॥ मामिति॥ स्फुटस्यविज्ञानंस्वप्नः स्वप्नंस्फुटस्यविज्ञानमितिविश्वः संदर्शनेसंविनदर्शनेस
मयेशास्त्रेदृष्टोस्वप्नोऽपिसंविदीतिशब्दार्णवे॥ स्वप्नाइतिसंदर्शनानि॥ स्वप्नज्ञानानिचनक्षादिवत्सामान्यविशे
षभावेनसहप्रयोगः॥ तेषुमयाकथमपिमहताप्रयत्नेनलब्धायागृहीतायादृष्टायाइतियावत्॥ तेनवनिर्दयाश्ले
षागाढालिंगनंमएवहेतुस्तस्यानिर्दयाश्लेषार्थमित्यर्थः॥ षष्ठीहेतुप्रयोगइतिषष्ठी॥ आकाशनिविषयेधृणिहि
तभुजेभसारितबाहुंमांपश्यंतीनोस्थलीदेवतानोमुक्तामौक्तिकानीवस्थूलाः भश्रुलेशबाष्पबिंदवस्तरुकि
सलयेषु॥ अनेनचलोचलेनाक्षधारणसमाधिर्ध्वन्यते॥ बाष्पशोनपतंतीतिनकिंतुपतंत्येवेत्यर्थः॥ निश्चयेन
क्त्वयप्रयोगः॥ तथालेकारिकसूत्रं स्मृतिनिश्चयसिद्धार्थेषुनक्त्वयप्रयोगइति॥ महात्मागुरुदेवानामश्रुपातःस्त्रि
यादिः॥ दशाचक्रेशामहादुःखेमरणेचमनोवृत्तावमिति॥ क्षितौदेवताश्रुतानिषधदर्शनाद्यस्यस्यमरणाभावस्त्र
चनार्थेनरुकिसलयेषुपतंतीत्युक्तं॥ ४७॥ भित्त्वासद्यःकिसलयपुटान्देवदारुद्रुमाणांयक्षैरस्मृतिसुरभयो
दक्षिणेनवहन्तः॥ आलिंग्यंतेगुणवतिमयोतेतुषाराद्रिवाताःपूर्वस्पृष्टंयदिकिलभवेदंगमभिस्तवेति॥ ४८॥
इदानींतदंगस्पृष्टवस्तुस्पर्शनमाह॥ भित्त्वेति॥ देवदारुद्रुमाणांकिसलयपुटान्पल्लवपुटान्सद्योभित्त्वायेन
क्षीरस्फुतिसुरभयएतेषांदेवदारुद्रुमाणांक्षीरस्रुतिभिःक्षीरनिष्यंदैः सुरभयःसुगंधयः तुषाराद्रि ३१

वातास्तेलिंगमिदं॥ येवातादक्षिणेनदक्षिणमार्गेणतृतीयाविधानेक्रत्यादिभ्यउपसंख्यानात्तृतीया॥ समंनपा
तीतिवत्॥ तत्रापिकरणत्वस्यप्रतीयमानत्वात्॥ कर्तृकरणयोरितृतीयेतिभाष्यकारः॥ प्रकृताश्चलिताः
हेगुणवतिसौशील्यसौकुमार्यादिगुणसंपन्ने॥ ते तुषाराद्रिवाताः॥ पूर्वंप्राक्कृष्णिर्वातस्तवांगंस्पृष्टंभवे
द्यदिकिलेतिसंभावितेऽप्यनुदितिबुध्येत्यर्थः॥ वार्तासंभाव्ययोःकिलेत्यमरः॥ मयाआलिंग्येतेआश्लिष्येतेऽ
त्रवायूनांस्पर्शेवैरूप्यमूर्त्तत्वेनालिंगनायोगादालिंग्येतइत्यभिधानेयक्षस्यान्यत्वात्स्वलयितमित्यदोषइ
तिवदन्निरुत्तरकारःस्वयमेवोन्मत्तप्रलापीत्युपेक्षणीयः॥ ४६॥ संक्षिप्येतेक्षणइवमयादीर्घयामात्रियामास
र्वावस्थास्वहरपिकथंमंदमंदातपेस्यात्॥ इत्थंचेतःचटुलनयनेदुर्लभंप्रार्थनंमेगाढोष्माभिःकृतमशर
णंत्वद्वियोगव्यवस्थाभिः॥ ५०॥ संक्षिप्येतेति॥ दीर्घायामाःप्रहरायस्याःसादीर्घमायाविरहवेदनयात
यात्प्रतीयमानेत्यर्थः त्रियामारात्रिरात्रेतयोरर्द्धयामयोर्दिनव्यवहारात्त्रियामेति॥ क्षीरस्वामीक्षणइवक
थंकेनप्रकारेणसंक्षिप्येतलघुक्रियेत॥ अहरपिसर्वावस्थासुसर्वकालेधित्यर्थः॥ मंदमंदमंदप्रकारः
प्रकारणगुणवचनस्येतिद्विरुक्तिः॥ कर्मधारयवदुत्तरपदेतिकर्मधारयवद्भावात्कृत्वोसुन्॥ मन्दमन्दातप
मल्पसंतापकथंस्यान्नस्यादेव॥ हे चटुलनयने चंचलाक्षि॥ इत्थंअनेनप्रकारेणदुर्लभंप्रार्थनमप्राप्यमा
नोरथंमममनोगाढोष्माभिरतितीव्राभिःत्वद्वियोगव्यथाभिरशरणमनार्यंकृतं॥ ५०॥ नन्वात्मानंबहुविगणय
न्नात्मनैवावलंबेतत्कल्याणित्वमपिसकतरंमागमःकातरत्वं॥ कस्यात्यंतंसुखमुपनतंदुःखमेकांततोवा
नीचैर्गच्छत्युपरिचदशाचक्रनेमिक्रमेण॥ ५८॥ नचमदीयदुर्दशाश्रवणेनैतव्यमित्याह नन्वेति एके
वाक्येतुशब्दोमदकः किंतुनमेत्तुल्यमित्यर्थः॥ अथवानन्वितिपाठः नच्यात्मंत्रणे॥ प्रश्नावधारणानु
ज्ञानुनयामंत्रणेनन्वित्यमरः॥ ननुप्रियेबहुविगणयन्नात्मानंसत्यवमेवंकरिष्यामीत्यावर्त्तयनात्मानंआ

त्मनैवस्वेनैव चक्रुत्यादिभ्यउपसंख्यानमिति तृतीया॥ भवत्सेवेधारयामि॥ यथाकथंचिज्जीवामीत्यर्थः॥ ततस्मात्कारणा
तूहकल्याणिकभगेतत्सौभाग्येनैवजीवामीतिभावः॥ वक्रादिभ्यश्चेतिङाप्युक्तमपिकृतरोलत्वंकातरत्वंभीरु
त्वंमागमःमागच्छगमेर्माङिलुङडुतिनमाड्योगइत्यडागमः॥ तादृक्सुखिनोरावयोरीदृशदुःखैकार्थनविभ
र्मीत्याशक्याह॥ कस्येति॥ कस्यजनस्यात्येतेनियतंसुखंउपनतंप्राप्तं॥ एकांततोनियमेनदुःखंवाउपनतंकिं
तुदशाअवस्थाचक्रस्यरथांगस्यनमिरतः॥ चक्रंरथांगंतस्योतेनमिः॥ स्त्रीस्यात्सार्थेःपुमानित्यमरः॥ तस्याःक्रम
णपरिपाट्याक्रमःशक्तोपरिपाट्यामितिविश्वः नीचैरधउपरिचगछतिप्रवर्त्तते॥ जेतोमरुवदुःखंपर्यावर्त्त
तेइत्यर्थः॥४८॥ शापांतेमेभुजगशयनादुत्थितेशार्ङ्गपाणौषान्मासाञ्चतुरोलोचनेमीलयित्वा॥ पश्चा
दावांविरहगुणितंतंतमात्माभिलाषंनिर्वेस्यावः परिणतशरच्चंद्रिकासुक्षपासु॥४९॥ नचनिरवधिकंमतदुः
खमित्याह॥ शापांतइति॥ शार्ङ्गनामधनुःपाणौस्थितंयस्य॥ तस्मिन्शार्ङ्गपाणौविष्णौसप्तम्युपमानेत्यादिना
बहुव्रीहिः॥ प्रहरणार्थेभ्यःपरेनिष्टासप्तम्योभवतइतिवक्तव्यात्पाणिशब्दस्योत्तरनिपातः॥ भुजगःशेषएव श
यनंतस्मादुत्थितेसतिमेशापांतःशापावसानंभविष्यतीतिशेषः॥ शेषान्चतुरोमासान्मेघदर्शनप्रहरति ह
रिर्बोधनादिनोतमित्यर्थः॥ दरशब्दादिवसाधिक्यंतुनविवक्षितमित्युक्तमेव॥ लोचनेमीलयित्वानिमील्यगमा
यधेर्येणातिवाहयेत्यर्थः॥ पश्चादहंचत्वंचआवां॥ त्यदादीनिसर्वनित्यमित्येकशेषः॥ त्यदादीनामिथोदृश्यस
च्छिष्यनइतिभस्मदःशेषः॥ विरहगुणितंभवमेवकरिष्यामीतिमनस्यावर्त्तितं॥ तंतंवीप्सायांद्विरुक्तिः॥ आ
त्मनोरावयोरभिलाषंमनोरथंपरिणताःशरच्चंद्रिकाःयासांतासुक्षपासुरात्रिषुनिर्वेस्यावः भाविन्यावेह विशत
र्लृट् निर्वेशाभ्रतिभाग्ययोरित्यमरः॥ अत्रकश्चिन्नभोनभस्ययोरेववार्षिकत्वात्कथमाषादादिचतुष्टयस्यवा
र्षिकत्वमुक्तमितिचोदयित्वाऋतुत्रयपक्षाश्रयणादविरोधइति॥ पर्यहारि॥ तत्सर्वमसंगतं॥ अत्रगतशेषाश्चत्वा ३२

रोमासाइत्युक्तंकविनानतुतेवार्षिकाइति॥ तस्मादनुक्तोपालंभएव॥ यच्चनाथेनोक्तंकथमाषादादिचतुष्टयात्परं
शरत्कालइतितत्रापिआर्काश्लेषकालेशरत्कालानुवृत्तेःपरिणतशरच्चंद्रिकासित्युक्तं॥ ननुतेदवशरत्काद
भावःउक्तइत्यविरोधएव॥४९॥ भूयश्चाहत्वमपिशयनेकण्ठलग्नापुरामनिद्रांगत्वाकिमपिरुदतीमस्फुटंविजबु
द्धा॥ सोतर्हिसंकथितमसकृत्त्वयाममदृष्टःस्वप्नेकितवरमयन्कामपित्वंमयेति॥५०॥ संप्रतितस्यामे
घवंचकत्वशंकानिरासायातिगूढमभिज्ञानमुपदिशति॥ भूयइति हेअबलेभूयःपुनरप्याहलङ्घ्यांमन्युरस्येन
तिशेषः मेघवचनमेतत्किमित्यतआहपुराशब्दश्चिरातीतेनिकटागामिकेपुरेत्यमरः॥
पुरापूर्ववशयनमेकंठलग्नापित्वा॥ गलबद्धस्यकथमपिगमनेनसंभवदितिभावः॥ निद्रांगत्वाकिमपिकेनचा
निमित्तेनेत्यर्थः॥ संस्वरंसशब्दंउच्चैरित्यर्थः॥ रुदतीसतीविप्रबुद्धा आसीदितिशेषः॥ असकृद्बहुशःदृष्टतो
मेहकितवत्वंकामपिरमयन्मयास्वप्नेदृष्टइतित्वयासोतर्हिसमंदहासंयथातथाकथितंचेदितिभर्त्ता
भूयश्चाहेतियोजना॥५०॥ एतस्मान्मेकुशलिनमभिज्ञानदानाद्हित्वामाकोलीनादसितनयनेमय्यवि
श्वासिनीभूः॥ स्नेहानाहुः किमपिविरहध्वंसिनस्त्वभागादिष्टे वस्तूत्सुपचितरसाःप्रेमराशीभवंति॥५१॥
एतस्मादितिएतस्मात्पूर्वोक्तान्॥ अभिज्ञायतेऽनेनेत्यभिज्ञानंलक्षणंतस्यदानात्स्वापणान्मेकुशलिनंक्षे
मवंतंविदित्वाहेअसितनयने॥ कुलेजनसमूहेभवात्कोलीनाल्लोकप्रवादादेतावताकालेनपरासुर्नो
चेदागछतीतिजनप्रवादादित्यर्थः॥ स्यात्कोलीनंलोकवादेयुद्धपक्षिद्विपक्षिणामित्यमरः॥ मयिविषय
विश्वासिनीमरणशंकिनीमाभूर्नभवा॥ भवतर्लृडनमाङ्योगइत्यडागमप्रतिषेधः॥ नचदीर्घकालवि
प्रकर्षात्पूर्वस्नेहनिवृत्तिशंक्येत्याहस्नेहानिति॥ किमपिकिंवानिमित्तेनविद्यतइतिशेषः॥ स्नेहान्प्रीतिं
विरहसत्यन्यान्यविप्रकर्षसतिध्वंसिनोविनश्वरानाहुः तत्तथानभ[illegible]तीत्यभिप्रायः किंतुतेस्नेहाअभो

गाढिरहेभोगाभावाद्वेतोः प्रसज्यप्रतिषेधेनञ्समासस्यतेनदृष्टवस्तुनिविषयेउपचितोरसःआस्वादोयस्मिन्उ
पचितरूढाःसंतःप्रवृद्धतृष्णाइत्यर्थः स्मोगंधरसस्वादेतिक्तादोविषगतयोरितिविश्वःप्रेमराशीभवंति॥वि
योगासहिष्णुमापद्यंतइत्यर्थः॥स्नेहप्रेम्णोरवस्तुषुदाढ्यंदः तदुक्तेआलोकनाभि लाषारागस्नेहोत
तःप्रेम रतिश्रृंगारयोगवियोगितावियोगितावियोगिताविप्रलंभश्चेति॥तदेवस्फुटीकृतंरसाकरे॥प्रेमादिदृक्षारम्येषुतच्चिंता
त्वमिलाषकः रागस्तत्संगबुद्धिःस्यात्स्नेहस्तत्स्मरणादिकृत्॥तद्वियोगासहंप्रेमरतिस्तत्सहवर्त्तनं॥शृंगार
स्तत्समः क्रीडासंयोगःसप्तधाकमात॥९१॥आश्वास्यैवंप्रथमविरहोद्ग्रथशोकांसखीनेशेतादासुविनय
नद्वेषोत्पातक्रूरान्निवृत्तः॥साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापिप्रातःकुंदप्रसवशिथिलंजीवितंधा
रयेथाः॥९२॥मिदानींयाचते॥आश्वास्येति॥प्रथमविरहेणोद्ग्रथशोकांतीवदुःखांतेसखींमेवंपूर्वोक्तरीत्याआ
श्वास्यउपजीव्यविनयनस्यत्र्यंबकस्यदृषणवृषभेणास्वाताअवदारिताःकृताःशिखराणियस्यतस्मात्कू
टोस्त्रीशिखरेश्रृंगमित्यमरः शेतांतंकैलासमातआश्रुनिवृत्तःसन्प्रत्यावृत्तःसन्साभिज्ञानेसलक्षणेयथा
तथाप्रहितेप्रेषितेकुशलेयेषुतेस्मरस्यारूढत्सखीवचोभिर्ममापिप्रातःकुंदप्रसवमिवशिथिलंदुर्बलंमम
जीवितमपिधारयेथाःस्थापय॥आर्यनायोलिङ्॥९२॥कच्चित्सोम्यव्यवसितमिदंबंधकृत्येत्वयामेप्रत्या
देशान्नखलुभवतोधीरतांतर्कयामि॥निशब्दोपिप्रदिशमिजलेयाचितस्यानर्थक्यंप्रत्युतंहिप्रणयि
षुसतामीप्सितार्थक्रियैव॥९३॥सेप्रतिमेघस्यप्रार्थनांगीकारंप्रश्नपूर्वकंकल्पयति॥कच्चिदिति॥हेसो
म्यसाधोदमेबंधुकृत्येबंधुकार्ये॥देवदत्तस्यगुरुकुलमितिवत्त्वयोगःव्यवसितंकच्चित्करिष्यामी
तिनिश्चितंकिंकच्चित्कामप्रवेदनइत्यमरः॥अभिप्रायज्ञापनंकामप्रवेदनं॥नचेतत्तूष्णींभावादनंगीका
रेणकेवलंतस्मिन्वाचितइत्याह॥प्रत्यादेशात्करिष्यामीतिप्रतिवचनात्॥उक्तिराभाषणंवाक्यमादेशो

३३

वचनंवचइतिशब्दार्णवे॥भवतस्तवधीरतांगंभीरत्वंनतर्कयामिनमेकल्पयामिखल्वसमर्थंयेतर्हिकर्त्तं
अंगीकारज्ञानेतत्राह॥याचितःसन्निःशब्दोपिनिर्गर्जितोप्रतिज्ञानानेत्यर्थः॥चातकेभ्योजलंप्रदिशामि
ददामि॥युक्तंचैतदित्याह॥सतांसत्पुरुषाणांप्रणयिषुयाचकेषुविषयेईप्सितार्थक्रियैवापेक्षितार्थसंपादन
मेवप्रत्युक्तंप्रतिवचनंक्रियाकेवलमुत्तरमित्यर्थः॥गर्जितंशरदिनवर्षतिवर्षतिवर्षांकनिष्फलोमेघःमीचा
वदतिनकुरुतेनवदतिसकजनःकरोत्येवतिभावः॥९३॥एतत्कृत्वाप्रियमनुचितंप्रार्थनादात्मनोमेसौहार्दाद्वा
विधुरइतिवामय्यनुक्रोशबुध्या॥इष्टान्देशान्जलदविचरप्रावृषासंभृतश्रीर्माभूदेवंक्षणमपिचतेविद्युता
विप्रयोगः॥९४॥ ॥इतिश्रीकालिदासस्यकृतौमेघसंदेशमहाकाव्येपरमेघः॥ ७ ॥संप्रतिस्वापरा
धसमाधानपूर्वकंस्वकार्यस्यावश्यंकरणंप्रार्थयमानोमेघंविसृजति एतदिति हेजलदसौहार्दात्सख्यु
द्भावात्॥उद्गमिष्यंतपूर्वपदस्यचत्युभयपदवृद्धिः॥विधुरोवियुक्तइतिहेतौवा विधुरमुक्तविश्लिष्टइत्य
मरः मयिविषयेअनुक्रोशबुध्याकरुणाबुध्यावाआत्मनस्तवानुचितमननुरूपमपिमत्प्रियंएतत्संदेशह
रणंप्रार्थनात्कृत्वाप्रावृषावर्षाभिःस्त्रियांप्रावृट्॥स्त्रियांभूम्निवर्षाइत्यमरः॥संभृतश्रीरुपचितशोभःस
न्निष्टानभिलषितान्॥देशान्विचरदेशेषुविचरत्यर्थः देशकालाध्वगंतव्याःकर्मसंज्ञात्यकर्मणा
मितिवचनात्कर्मत्वमुएवंमहत्क्षणमपिस्वल्पकालमपितेतवविद्युताकलत्रेणातिशेषः विप्रयोगोवि
रहोमाभून्मास्तुमाडित्याशिषिलुङ्॥अंतेकाव्यस्यनित्यत्वात्कुर्यादाशिषिमुत्तमो॥सर्वत्रव्याप्यतद्वि
द्वानायकछानुरूपिणीमितिसारस्वतालंकारदर्शनात्काव्यांतेनायकछानुरूपायमाशीर्वादःप्र
युक्तइत्यनुसंधेयं॥ ॥इतिश्रीमहोपाध्यायमल्लिनाथसूरिविरचितायांमेघसंदेशव्याख्यायांसर्जावि
न्यांउत्तरमेघःसमाप्तः॥ शुभंभवतु॥श्रीगुरुदत्तात्रेयार्पणमस्तु॥ ७ ॥ ॥७॥ ॥७॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017